# bRihajjAtaka by varAhamihIra

# વરાહમિહીરસ્ય બૃહજ્જાતક

## Document Information

Text title : brihajjAtakam

File name : brihajjAtakam.itx

Category : jyotisha, sociology_astrology, varAhamihira

Location : doc_z_misc_sociology_astrology

Author : Varahamihira

Transliterated by : Mizue Sugita December 12, 1994 Radu Canahai clradu at yahoo.com

Proofread by : Radu Canahai clradu at yahoo.com

Latest update : December 12, 1994, August 02, 2002

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# વરાહમિહીરસ્ય બૃહજ્જાતક

પ્રથમોऽધ્યાયઃ

રાશિ પ્રભેદ

મૂર્તિત્વે પરિકલ્પિતઃ શશ ભૃતો વર્ત્માપુનર્જન્મનામાત્મેત્યાત્મ
વિદાં ક્રતુશ્ચ યજતાં ભર્તામર જ્યોતિષામ્ ।
લોકાનાં પ્રલયોદ્ભવસ્થિતિ વિભુશ્ચાનેકધાયઃ શ્રુતૌ વાચં નઃ
સદદાત્વનેક કિરણસ્ત્રૈલોક્યદીપો રવિઃ ॥ ૧॥

ભૂયોભિઃ પટુબુદ્ધિભિઃ પટુધિયાં હોરાફલજ્ઞપ્તયે
શબ્દન્યાયસમન્વિતેષુ બહુશઃ શાસ્ત્રેષુ દૃષ્ટેષ્વપિ ।
હોરાતન્ત્ર મહાર્ણવ પ્રતરણે ભગ્નોદ્યમાનામ્ અહં સ્વલ્પં
વૃત્ત વિચિત્રમ્ અર્થ બહુલં શાસ્ત્ર પ્લવં પ્રારભે ॥ ૨॥

હોરેત્યહો રાત્ર વિકલ્પમ્ એકે વાઞ્છન્તિ પૂર્વાપર વર્ણ લોપાત્ ।
કર્માજિતં પૂર્વ ભવે સદ્ આદિ યત્ તસ્ય પઙ્ક્તિં સમભિવ્યનક્તિ ॥ ૩॥

કાલાઙ્ગાનિ વરાઙ્ગમાનનમ્ ઉરો હૃત્ ક્રોડ વાસો ભૃતો
બસ્તિર્વ્યઞ્જનમ્ ઊરુ જાનુ યુગુલે જઙ્ઘે તતોऽઙ્ઘ્રિ દ્વયમ્ ।
મેષાશ્વિ પ્રથમા નવઋક્ષ ચરણાશ્ચક્ર સ્થિતારાશયો
રાશિ ક્ષેત્ર ગૃહઋક્ષ ભાનિ ભવનં ચૈકાર્થ સમ્પ્રત્યયાઃ ॥ ૪॥

મત્સ્યૌ ઘટી નૃ મિથુનં સ ગદં સ વીણં ચાપી નરોऽશ્વ જઘનો મકરો મૃગાસ્યઃ ।
તૌલી સ સસ્યદહના પ્લવગા ચ કન્યા શેષાઃ સ્વનામ સદૃશાઃ સ્વચરાશ્ચ સર્વે ॥ ૫॥

ક્ષિતિજ સિત જ્ઞ ચન્દ્રરવિ સૌમ્ય સિતાવનિજાઃ સુર ગુરુ મન્દ સૌરિ ગુરવશ્ચ ગૃહાંશકપઃ ।
અજ મૃગ તૌલિ ચન્દ્ર ભવનાદિ નવાંશ વિધિર્ભવન સમાંશકાધિપતયઃ સ્વ ગૃહાત્ ક્રમશઃ ॥ ૬॥

કુજરવિજ ગુરુ જ્ઞ શુક્ર ભાગાઃ પવન સમીરણ કૌર્પિ જૂક લેયાઃ ।
અયુજિ યુજિ તુ ભે વિપર્યયસ્થઃ શસિ ભવનાલિ ઝષાન્તમ્ ઋક્ષ સંધિઃ ॥ ૭॥

ક્રિય તાવુરિ જિતુમ કુલીર લેય પાથોન જૂક કૌર્પ્યાખ્યાઃ ।

તૌક્ષિકાકોકેરો હૃદ્ રોગશ્ચાન્ત્ય ભં ચેત્થમ્ ॥ ૮॥

દ્રેષ્કાણ હોરા નવ ભાગ સંજ્ઞાસ્ત્રિંશાંશકદ્વાદશ સંજ્ઞિતાશ્ચ ।
ક્ષેત્રં ચ યદ્યસ્ય સ તસ્ય વર્ગો હોરેતિ લગ્નં ભવનસ્ય ચાર્ધમ્ ॥ ૯॥

ગોઽજાશ્વિ કર્કિ મિથુનાઃ સ મૃગા નિશાખ્યાઃ પૃષ્ઠોદયા વિમિથુનાઃ કથિતાસ્તૈવ ।
શીર્ષોદયાદિન બલાશ્ચ ભવન્તિ શેષા લગ્નં સમેત્યુભયતઃ પૃથુરોમ યુગ્મમ્ ॥ ૧૦॥

ક્રૂરઃ સૌમ્યઃ પુરુષ વનિતે તે ચરાગ દ્વિ દેહાઃ પ્રાગાદીશાઃ ક્રિય વૃષ નૃયુક્ કર્કટાઃ સ ત્રિકોણાઃ ।
માર્તણ્ડેન્દ્વોરયુજિ સમભે ચન્દ્ર ભાન્વોશ્ચ હોરે દ્રેષ્કાણાઃ સ્યુઃ સ્વ ભવન સુત ત્રિત્રિકોણાધિપાનામ્ ॥ ૧૧॥

કે ચિત્ તુ હોરાં પ્રથમાં ભપસ્ય વાઞ્છન્તિ લાભાધિપતેર્દ્વિતીયામ્ ।
દ્રેષ્કાણ સંજ્ઞામ્ અપિ વર્ણયન્તિ સ્વદ્વાદશૈકાદશરાશિપાનામ્ ॥ ૧૨॥

અજ વૃષભ મૃગાઙ્ગના કુલીરા ઝષ વણિજા ચ દિવાકરાદિ તુઙ્ગાઃ ।
દશ શિખિ મનુ યુક્ તિથીન્દ્રિયાંશૈસ્ત્રિ નવક વિંશતિભિશ્ચ તે અસ્ત નીચાઃ ॥ ૧૩॥

વર્ગોત્તમાશ્ચરગૃહાદિષુ પૂર્વ મધ્ય પર્યન્તતઃ શુભ ફલા નવ ભાગ સંજ્ઞાઃ ।
સિંહો વૃષ પ્રથમ ષષ્ઠ હયાઙ્ગ તૌલિ કુમ્ભાસ્ત્રિકોણ ભવનાનિ ભવન્તિ સૂર્યાત્ ॥ ૧૪॥

હોરાદયસ્તનુ કુટુમ્બ સહોત્થ બન્ધુ પુત્રારિ પત્ની મરણાનિ શુભાસ્પદાયાઃ ।
રિઃફાખ્યમ્ ઇત્યુપચયાન્યરિ કર્મ લાભદુશ્ચિક્ય સંજ્ઞિત ગૃહાણિ ન નિત્યમ્ એકે ॥ ૧૫॥

કલ્પ સ્વ વિક્રમ ગૃહ પ્રતિભા ક્ષતાનિ ચિત્તોત્થરન્ધ્ર ગુરુ માન ભવ વ્યયાનિ ।
લગ્નાચ્ચતુર્થ નિધને ચતુરસ્ર સંજ્ઞે દ્યૂનં ચ સપ્તમ ગૃહં દશમઋક્ષમ્ આજ્ઞા ॥ ૧૬॥

કણ્ટક કેન્દ્ર ચતુષ્ટય સંજ્ઞાઃ સપ્તમ લગ્ન ચતુર્થ ખ ભાનામ્ ।
તેષુ યથાભિહિતેષુ બલાઢ્યાઃ કીટ નરાંબુ ચરાઃ પશવશ્ચ ॥ ૧૭॥

કેન્દ્રાત્ પરં પણફરં પરતસ્તુ સર્વ ભાપોક્લિમં હિબુકમ્ અમ્બુ સુખં ચ વેશ્મ ।
જામિત્રમ્ અસ્ત ભવનં ત્રિકોણં મેષૂરણં દશમમ્ અત્ર ચ કર્મ વિદ્યાત્ ॥ ૧૮॥

હોરા સ્વામિ ગુરુ જ્ઞ વીક્ષિતયુતા નાન્યૈશ્ચ વીર્યોત્કટા
કેન્દ્રસ્થા દ્વિ પદાદયોઽહ્નિ નિશિ ચ પ્રાપ્તે ચ સંધ્યાદ્વયે ।
પૂર્વાર્ધે વિષયાદયઃ કૃત ગુણા માનં પ્રતીપં ચ
તદ્દુશ્ચિક્યં સહજં તપશ્ચ નવમં ત્ર્યાદ્યાં ત્રિકોણં ચ તત્ ॥ ૧૯॥

રક્તઃ શ્વેતઃ શુક તનુ નિભઃ પાટલો ધૂમ્ર પાંડુશ્ચિત્રઃ
કૃષ્ણઃ કનક સદૃશઃ પિઙ્ગલઃ કર્બુરશ્ચ ।
બભ્રુઃ સ્વચ્છઃ પ્રથમ ભવનાદ્યેષુ વર્ણાઃ પ્લવત્વં

સ્વામ્યાશાખ્યં દિન કરયુતાદ્ ભાદ્ દ્વિતીયં ચ વેશિઃ ॥ ૨૦॥

---

દ્વિતીયોઽધ્યાયઃ

ગ્રહ ભેદ

કાલાત્માદિન કૃન્ મનસ્તુહિનગુઃ સત્વં કુજો જ્ઞો વચો
જીવો જ્ઞાન સુખે સિતશ્ચ મદનો દુઃખં દિનેશાત્મજઃ ।
રાજાનૌ રવિ શીતગૂ ક્ષિત સુતો નેતા કુમારો બુધઃ સૂરિર્દાનવ
પૂજિતશ્ચ સચિવૌ પ્રેષ્યઃ સહસ્રાંશુજઃ ॥ ૧॥

હેલિઃ સૂર્યશ્ચન્દ્રમાઃ શીતરશ્મિર્હેમ્નો વિજ્ જ્ઞો બોધનશ્ચેન્દુ પુત્રઃ ।
આરો વક્રઃ ક્રૂરદૃક્ ચાવનેયઃ કોણો મન્દઃ સૂર્ય પુત્રોઽસિતશ્ચ ॥ ૨॥

જીવોઽઙ્ગિરાઃ સુર ગુરુર્વચસાં પતીજ્યઃ શુક્રો ભૃગુર્ભૃગુસુતઃ સિતાસ્ફુજિચ્ચ ।
રાહુસ્તમોઽગુરસુરશ્ચ શિખીતિ કેતુઃ પર્યાયમ્ અન્યમ્ ઉપલભ્ય વદેચ્ચ લોકાત્ ॥ ૩॥

રક્ત શ્યામો ભાસ્કરો ગૌરેન્દુર્નાત્યુચ્ચાઙ્ગો રક્ત ગૌરશ્ચ વક્રઃ ।
દૂર્વા શ્યામો જ્ઞો ગુરુર્ગૌર ગાત્રઃ શ્યામઃ શુક્રો ભાસ્કરિઃ કૃષ્ણદેહઃ ॥ ૪॥

વર્ણાસ્તામ્ર સિતાતિરક્ત હરિત વ્યાપીત ચિત્રાસિતા ।
બહ્નૂન્યમ્બ્વગ્નિજ કેશવેન્દ્ર શચિકાઃ સૂર્યાદિ નાથાઃ ક્રમાત્ ।
પ્રાગાદ્યારવિ શુક્ર લોહિત તમઃ સૌરેન્દુ વિત્ સૂરયઃ ક્ષીણેન્દ્વર્ક
મહી સુતાર્ક તનયાઃ પાપા બુધસ્તૈર્યુતઃ ॥ ૫॥

બુધ સૂર્ય સુતૌ નપુંસકાખ્યૌ શશિ શુક્રૌ યુવતી નરાશ્ચ શેષાઃ ।
શિખિભૂ ખ પયો મરુદ્ ગણાનાં વશિનો ભૂમિ સુતાદયઃ ક્રમેણ ॥ ૬॥

વિપ્રાદિતઃ શુક્ર ગુરૂ કુજાર્કૌ શશી બુધશ્ચેત્યસિતાન્ત્યજાનામ્ ।
ચન્દ્રાર્ક જીવા જ્ઞ સિતૌ કુજાર્કી યથા ક્રમં સત્વરજસ્તમાંસિ ॥ ૭॥

મધુ પિઙ્ગલદૃક્ ચતુરસ્ર તનુઃ પિત્ત પ્રકૃતિઃ સવિતાલ્પ કચઃ ।
તનુ વૃત્ત તનુર્બહુ વાત કફઃ પ્રાજ્ઞશ્ચ શશી મૃદુ વાક્ શુભદૃક્ ॥ ૮॥

ક્રૂરદૃક્ તરુણ મૂર્તિરુદારઃ પૈત્તિકઃ સુચપલઃ કૃશ મધ્યઃ ।
શ્લિષ્ટવાક્ સતત હાસ્યરુચિર્જ્ઞઃ પિત્ત મારુત કફ પ્રકૃતિશ્ચ ॥ ૯॥

બૃહત્ તનુઃ પિઙ્ગલ મૂર્ધજેક્ષણો બૃહસ્પતિઃ શ્રેષ્ઠ મતિઃ કફાત્મકઃ ।
ભૃગુઃ સુખી કાન્ત વપુઃ સુલોચનઃ કફાનિલાત્માસિત વક્ર મૂર્ધજઃ ॥ ૧૦॥

મન્દોઽલસઃ કપિલદૃક્ કૃશદીર્ઘ ગાત્રઃ સ્થૂલદ્વિજઃ પરુષરોમ કચોઽનિલાત્મા ।
સ્નાય્વસ્થ્યસૃક્ ત્વગ્ અથ શુક્ર વસે ચ મજ્જા મન્દાર્ક ચન્દ્ર બુધ શુક્ર સુરેજ્ય ભૌમાઃ ॥ ૧૧॥

દેવામ્બ્વગ્નિ વિહાર કોશ શયન ક્ષિત્યુત્કરેશાઃ ક્રમાત્ ।
વસ્ત્રં સ્થૂલમ્ અભુક્તમ્ અગ્નિક હતં મધ્યં દૃઢં સ્ફાટિતમ્ ।
તામ્રં સ્યાન્ મણિ હેમયુક્તિ રજતાન્યર્કાચ્ચ મુક્તાયસી ।
દ્રેષ્કાણૈઃ
શિશિરાદયઃ શશુ રુચ જ્ઞ ગ્વાદિષૂદ્યત્સુ વા ॥ ૧૨॥

ત્રિ દશ ત્રિકોણ ચતુરસ્ર સપ્તમાન્યવલોકયન્તિ ચરણાભિવૃદ્ધિતઃ ।
રવિજામરેજ્યરુધિરાઃ પરે ચ યે ક્રમશો ભવન્તિ કિલ વીક્ષણે અધિકાઃ ॥ ૧૩॥

અયન ક્ષણ વાસરર્ત્તવો માસોઽર્ધં ચ સમાશ્ચ ભાસ્કરાત્ ।
કટુક લવણ તિક્ત મિશ્રિતા મધુરામ્લૌ ચ કષાયેત્યપિ ॥ ૧૪॥

જીવો જીવ બુધૌ સિતેન્દુ તનયૌ વ્યર્કા વિભૌમાઃ ક્રમાદ્ વીન્દ્વર્કા
વિકુજેન્દ્વિનાશ્ચ સુહૃદઃ કેષાં ચિદ્ એવં મતમ્ ।
સત્યોક્તે સુહૃદસ્ત્રિકોણ ભવનાત્ સ્વાત્ સ્વાન્ત્યધી ધર્મપાઃ
સ્વોચ્ચાયુઃ સુખપાઃ સ્વલક્ષણ વિધેર્નાન્યૈર્વિરોધાદ્ ઇતિ ॥ ૧૫॥

શત્રૂ મન્દ સિતૌ સમશ્ચ શશિજો મિત્રાણિ શેષારવેસ્-
તીક્ષ્ણાંશુર્હિમરશ્મિજશ્ચ સુહૃદૌ શેષાઃ સમાઃ શીતગોઃ ।
જીવેન્દૂષ્ણ કરાઃ કુજસ્ય સુહૃદો જ્ઞોઽરિઃ સિતાર્કી સમૌ
મિત્રે સૂર્ય સિતૌ બુધસ્ય હિમગુઃ શત્રુઃ સમાશ્ચાપરે ॥ ૧૬॥

સૂરઃ સૌમ્ય સિતાવરી રવિ સુતો મધ્યોઽપરે ત્વન્યથા સૌમ્યાર્કી
સુહૃદૌ સમૌ કુજ ગુરૂ શુક્રસ્ય શેષાવરી ।
શુક્રજ્ઞૌ સુહૃદૌ સમઃ સુર ગુરુઃ સૌરસ્ય ચાન્યે અરયો યે
પ્રોક્તાઃ સ્વ ત્રિકોણ ભાદિષુ પુનસ્તે અમી મયા કીર્તિતાઃ ॥ ૧૭॥

અન્યોન્યસ્યધન વ્યયાય સહજ વ્યાપાર બન્ધુ સ્થિતાસ્તત્ કાલે
સુહૃદઃ સ્વ તુઙ્ગ ભવને અપ્યેકે અરયસ્ત્વન્યથા ।
દ્વ્યેકાનુક્ત ભપાન્ સુહૃત્ સમરિપૂન્ સંચિન્ત્ય નૈસર્ગિકાંસ્તત્ કાલે ચ
પુનસ્તુ તાન્ અધિસુહૃન્ મિત્રાદિભિઃ કલ્પયેત્ ॥ ૧૮॥

સ્વોચ્ચ સુહૃત્ સ્વ ત્રિકોણ નવાંશૈઃ સ્થાન બલં સ્વ ગૃહોપગતૈશ્ચ ।
દિક્ષુ બુધાઙ્ગિરસૌ રવિ ભૌમૌ સૂર્ય સુતઃ સિત શીત કરૌ ચ ॥ ૧૯॥

ઉદગ્ અયને રવિ શીત મયૂખૌ વક્ર સમાગમગાઃ પરિશેષાઃ ।
વિપુલ કરા યુધિ ચોત્તર સંસ્થાશ્ચેષ્ટિત વીર્યયુતા પરિકલ્પ્યાઃ ॥ ૨૦॥

નિશિ શશિ કુજ સૌરાઃ સર્વદા જ્ઞોઽહ્નિ ચાન્યે ।
બહુલ સિત ગતાઃ સ્યુઃ ક્રૂર સૌમ્યાઃ ક્રમેણ ।
દ્વ્યયનદિવસ હોરા માસપૈઃ કાલ વીર્યં શરુ બુ ગુ શુ ચ સાદ્યા વૃદ્ધિતો વીર્યવન્તઃ ॥ ૨૧॥

---

તૃતીયોઽધ્યાયઃ

વિયોનિજન્મ

ક્રૂર ગ્રહૈઃ સુબલિભિર્વિબલૈશ્ચ સૌમ્યૈઃ ક્લીબે ચતુષ્ટય ગતે તદવેક્ષણાદ્ વા ।
ચન્દ્રોપગ દ્વિ રસ ભાગ સ માનરૂપં સત્વં વદેદ્ યદિ ભવેત્ સ વિયોનિ સંજ્ઞઃ ॥ ૧॥

પાપા બલિનઃ સ્વ ભાગગાઃ પારક્યે વિબલાશ્ચ શોભનાઃ ।
લગ્નં ચ વિયોનિ સંજ્ઞકં દૃષ્ટ્વાત્રાપિ વિયોનિમ્ આદિશેત્ ॥ ૨॥

ક્રિયઃ શિરો વક્ર ગલે વૃષોઽન્યે પાદાંશકં પૃષ્ઠમ્ ઉરોઽથ પાર્શ્વે ।
કુક્ષિસ્ત્વપાનાઙ્ઘ્રાથ મેઢ્ર મુષ્કૌ સ્ફિક્ પુચ્છમ્ ઇત્યાહ ચતુષ્પદાઙ્ગે ॥ ૩॥

લગ્નાંશકાદ્ ગ્રહયોગેક્ષણાદ્ વા વર્ણાન્ વદેદ્ બલયુક્તા દ્વિ યોનૌ ।
દૃષ્ટ્યા સ માનાન્ પ્રવદેત્ સ્વ સંખ્યયારેખાં વદેત્ સ્મર સંસ્થૈશ્ચ પૃષ્ઠે ॥ ૪॥

ખગે દૃકાણે બલસંયુતેન વા ગ્રહેણયુક્તે ચરભાંશકોદયે ।
બુધાંશકે વા વિહગાઃ સ્થલાંબુજાઃ શનૈશ્ચરેન્દ્વીક્ષણયોગ સંભવાઃ ॥ ૫॥

હોરેન્દુ સૂરિ રવિભિર્વિબલૈસ્તરુણાં તોયે સ્થલે તરુ ભવાંશ કૃતઃ પ્રભેદઃ ।
લગ્નાદ્ ગ્રહઃ સ્થલ જલઋક્ષ પતિસ્તુ યાવાંસ્તાવન્તૈવ તરવઃ સ્થલ તોય જાતાઃ ॥ ૬॥

અન્તઃ સારાગ્ જનયતિ રવિર્દુર્ભગાન્ સૂર્ય સૂનુઃ ક્ષીરોપેતાંસ્તુહિન કિરણઃ કણ્ટકાઢ્યાંશ્ચ ભૌમઃ ।
વાગ્ ઈશ જ્ઞૌ સ ફલ વિફલાન્ પુષ્પ વૃક્ષાંશ્ચ શુક્રઃ
સ્નિગ્ધાન્ ઇન્દુઃ કટુક વિટપાન્ ભૂમિ પુત્રશ્ચ ભૂયઃ ॥ ૭॥

શુભો શુભઋક્ષે રુચિરં કુભૂમિજં કરોતિ વૃક્ષં વિપરીતમ્ અન્યથા
પરાંશકે યાવતિ વિચ્યુતઃ સ્વકાદ્ ભવન્તિ તુલ્યાસ્તરવસ્તથા વિધાઃ ॥ ૮॥

---

ચતુર્થોઽધ્યાયઃ

નિષેકા

કુજેન્દુ હેતુઃ પ્રતિમાસમ્ આર્તવં ગતે તુ પીડઋક્ષમ્ અનુષ્ણદિધિતૌ ।

અતોઽન્યથાસ્થે શુભ પુંગ્રહેક્ષિતે નરેણ સંયોગમ્ ઉપૈતિ કામિની ॥ ૧॥

યથાસ્તરાશિર્મિથુનં સમેતિ તથૈવ વાચ્યો મિથુન પ્રયોગઃ ।
અસદ્ ગ્રહાલોકિત સંયુતે અસ્તે સરોષેષ્ટૈઃ સ વિલાસ હાસઃ ॥ ૨॥

રવીન્દુ શુક્રાવનિજૈઃ સ્વભાગગૈર્ગુરૌ ત્રિકોણોદય સંસ્થિતેઽપિ વા ।
ભવત્યપત્યં હિ વિબીજિનામ્ ઇમે કરા હિમાંશોર્વિદૃશામ્ ઇવાફલાઃ ॥ ૩॥

દિવાકરેન્દ્વોઃ સ્મરગૌ કુજાર્કજૌ ગદ પ્રદા પુઙ્ગલયોષિતોસ્તદા ।
વ્યય સ્વગૌ મૃત્યુકરૌ યુતૌ તથા તદેકદૃષ્ટ્યા મરણાય કલ્પિતૌ ॥ ૪॥

દિવાર્ક શુક્રૌ પિતૃ માતૃ સંજ્ઞિતૌ શનૈશ્ચરેન્દૂ નિશિ તદ્વિપર્યયાત્ ।
પિતૃવ્ય માતૃ સ્વસૃ સંજ્ઞિતૌ ચ તાવથૌજયુગ્મઋક્ષ ગતૌ તયોઃ શુભૌ ॥ ૫॥

અભિલષદ્ભિરુદયઋક્ષમ્ અસદ્ભિર્મરણમ્ એતિ શુભદૃષ્ટિમ્ અયાતે ।
ઉદયરાશિ સહિતે ચ યમે સ્ત્રી વિગલિતોડુ પતિ ભૂ સુતદૃષ્ટે ॥ ૬॥

પાપદ્વય મધ્ય સંસ્થિતૌ લગ્નેન્દૂ ન ચ સૌમ્ય વીક્ષિતૌ ।
યુગપત્ પૃથગ્ એવ વા વદેન્ નારી ગર્ભયુતા વિપદ્યતે ॥ ૭॥

ક્રૂરે શશિનશ્ચતુર્થગે લગ્નાદ્ વા નિધનાશ્રિતે કુજે ।
બન્ધ્વન્ત્યગયોઃ ક્ષીણેન્દૌ નિધનાય પૂર્વવત્ ॥ ૮॥

ઉદયાસ્તગયોઃ કુજાર્કયોર્નિધનં શસ્ત્ર કૃતં વદેત્ તથા ।
માસાધિપતૌ નિપીડિતે તત્ કાલે સ્રવણં સમાદિશેત્ ॥ ૯॥

શશાઙ્ક લગ્નોપગતૈઃ શુભ ગ્રહૈસ્ત્રિકોણ જાયાર્થ સુખાસ્પદ સ્થિતૈઃ ।
તૃતીય લાભઋક્ષ ગતૈશ્ચ પાપકૈઃ સુખી તુ ગર્ભો રવિણા નિરીક્ષિતઃ ॥ ૧૦॥

ઓજઋક્ષે પુરુષાંશકેષુ બલિભિર્લગ્નાર્ક ગુર્વિન્દુભિઃ પુંજન્મ
પ્રવદેત્ સમાંશક ગતૈર્યુગ્મેષુ તૈર્યોષિતઃ ।
ગુર્વર્કૌ વિષમે નરં શશિ સિતૌ વક્રશ્ચ યુગ્મે સ્ત્રિયમ્ ।
દ્વ્યઙ્ગસ્થ
બુધ વીક્ષણાચ્ચ યમલૌ કુર્વન્તિ પક્ષે સ્વકે ॥ ૧૧॥

વિહાય લગ્નં વિષમઋક્ષ સંસ્થઃ સૌરોઽપિ પુંજન્મ કરો વિલગ્નાત્ ।
પ્રોક્ત ગ્રહાણામ્ અવલોક્ય વીર્યં વાચ્યઃ પ્રસૂતૌ પુરુષોઽઙ્ગના વા ॥ ૧૨॥

અન્યોન્યં યદિ પશ્યતઃ શશિ રવી યદ્યર્કિ સૌમ્યાવપિ વક્રો વા
સમગં દિનેશમ્ અસમે ચન્દ્રોદયૌ ચેત્ સ્થિતૌ ।

યુગ્મૌજઋક્ષ ગતાવપીન્દુ શશિજૌ ભૂમ્યાત્મજેનેક્ષિતૌ
પુમ્ભાવે સિત લગ્ન શીત કિરણાઃ ષટ્ ક્લીબયોગાઃ સ્મૃતાઃ ॥ ૧૩॥

યુગ્મે ચન્દ્ર સિતૌ તથૌજ ભવને સ્યુર્જ્ઞાર જીવોદયા
લગ્નેન્દૂ નૃ નિરીક્ષિતૌ ચ સમગૌ યુગ્મેષુ વા પ્રાણિનઃ ।
કુર્યુર્તે મિથુનં ગ્રહોદય ગતાન્ દ્વ્યઙ્ગાંશકાન્ પશ્યતિ સ્વાંશે
જ્ઞે ત્રિતયં જ્ઞગાંશક વશાદ્ યુગ્મં ત્વમિશ્રૈઃ સમમ્ ॥ ૧૪॥

ધનુર્ધરસ્યાન્ત્યગતે વિલગ્ને ગ્રહૈસ્તદંશોપગતૈર્બલિષ્ઠૈઃ ।
જ્ઞેનાર્કિણા વીર્યયુતેનદૃષ્ટૈઃ સન્તિ પ્રભૂતાપિ કોશ સંસ્થાઃ ॥ ૧૫॥

કલલ ઘનાઙ્કુરાસ્થિ ચર્માઙ્ગજ ચેતનતાઃ સિત કુજ જીવ સૂર્ય ચન્દ્રાર્કિ બુધાઃ પરતઃ ।
ઉદયપ ચન્દ્ર સૂર્ય નાથાઃ ક્રમશો ગદિતા ભવન્તિ શુભાશુભં ચ માસાધિપતેઃ સદૃશમ્ ॥ ૧૬॥

ત્રિકોણગે જ્ઞે વિબલૈસ્તથા પરૈર્મુખાઙ્ઘ્રિ હસ્તૈર્દ્વિગુણસ્તદા ભવેત્ ।
અવાગ્ ગવીન્દાવશુભૈર્ભ સંધિગૈઃ શુભેક્ષિતશ્ચેત્ કુરુતે ગિરં ચિરાત્ ॥ ૧૭॥

સૌમ્યઋક્ષાંશે રવિજરુધિરૌ ચેત્ સ દન્તોઽત્ર જાતઃ કુબ્જઃ
સ્વઋક્ષે શશિનિ તનુગે મન્દ માહેયદૃષ્ટે ।
પઙ્ગુર્મીને યમ શશિ કુજૈર્વીક્ષિતે લગ્ન સંસ્થે સંધૌ પાપે
શશિનિ ચ જડઃ સ્યાન્ ન ચેત્ સૌમ્યદૃષ્ટઃ ॥ ૧૮॥

સૌર શશાઙ્કદિવા કરદૃષ્ટે વામનકો મકરાન્ત્ય વિલગ્ને ।
ધી નવમોદયગૈશ્ચ દૃકાણૈઃ પાપયુતૈરભુજાઙ્ઘ્રિ શિરાઃ સ્યાત્ ॥ ૧૯॥

રવિ શશિ યુતે સિંહે લગ્ને કુજાર્કિ નિરીક્ષિતે નયનરહિતઃ સૌમ્યાસૌમ્યૈઃ સ બુદ્બુદ લોચનઃ ।
વ્યય ગૃહ ગતશ્ચન્દ્રો વામં હિનસ્ત્યપરં રવિર્ન શુભ
ગદિતા યોગા યાપ્યા ભવન્તિ શુભેક્ષિતાઃ ॥ ૨૦॥

તત્ કાલમ્ ઇન્દુ સહિતો દ્વિ રસાંશકો યસ્તત્ તુલ્યરાશિ સહિતે પુરતઃ શશાઙ્કે ।
યાવાન્ ઉદેતિ દિનરાત્રિ સ માન ભાગસ્તાવદ્ ગતે દિન નિશોઃ પ્રવદન્તિ જન્મ ॥ ૨૧॥

ઉદયતિ મૃદુ ભાંશે સપ્તમસ્થે ચ મન્દે યદિ ભવતિ નિષેકઃ સૂતિરબ્દ ત્રયેણ ।
શશિનિ તુ વિધિરેષ દ્વાદશે અબ્દે પ્રકુર્યાન્ નિગદિતમ્ ઇહ ચિન્ત્યં સૂતિ કાલે અપિ યુક્ત્યા ॥ ૨૨॥

---

પંચમોઽધ્યાય

જન્મવિધિ

પિતુર્જાતઃ પરોક્ષસ્ય લગ્નમ્ ઇન્દાવપશ્યતિ ।

વિદેશસ્થસ્ય ચર ભે મધ્યાદ્ ભ્રષ્ટે દિવા કરે ॥ ૧॥

ઉદયસ્થેઽપિ વા મન્દે કુજે વાસ્તં સમાગતે
સ્થિતે વાન્તઃ ક્ષપા નાથે શશાઙ્કુ સુત શુક્રયોઃ ॥ ૨॥

શશાઙ્કે પાપ લગ્ને વા વૃશ્ચિકેશ ત્રિ ભાગગે ।
શુભૈઃ સ્વાય સ્થિતૈર્જાતઃ સર્પસ્તદ્વેષ્ટિતોઽપિ વા ॥ ૩॥

ચતુષ્પાદ ગતે ભાનૌ શેષૈર્વીર્ય સમન્વિતૈઃ ।
દ્વિ તનુસ્થૈશ્ચ યમલૌ ભવતઃ કોશ વેષ્ટિતૌ ॥ ૪॥

છાગે સિંહે વૃષે લગ્ને તત્સ્થે સૌરે અથ વા કુજે ।
રાશ્યંશ સદૃશે ગાત્રે જાયતે નાલ વેષ્ટિતઃ ॥ ૫॥

ન લગ્નમ્ ઇન્દું ચ ગુરુર્નિરીક્ષતે ન વા શશાઙ્કં રવિણા સમાગતમ્ ।
સ પાપકોઽર્કેણયુતોઽથ વા શશી પરેણ જાતં પ્રવદન્તિ નિશ્ચયાત્ ॥ ૬॥

ક્રૂરઋક્ષ ગતાવશોભનૌ સૂર્યાદ્ દ્યૂન નવાત્મજ સ્થિતૌ ।
બધ્દસ્તુ પિતા વિદેશગઃ સ્વે વા રાશિ વશાદ્ અથો પથિ ॥ ૭॥

પૂર્ણે શશિનિ સ્વરાશિગે સૌમ્યે લગ્ન ગતે શુભે સુખે ।
લગ્ને જલજે અસ્તગે અપિ વા ચન્દ્રો પોત ગતા પ્રસૂયતે ॥ ૮॥

આપ્યોદયમ્ આપ્યગઃ શશી સમ્પૂર્ણઃ સમવેક્ષતે અથ વા ।
મેષૂરણ બન્ધુ લગ્નગઃ સ્યાત્ સૂતિઃ સલિલે ન સંશયઃ ॥ ૯॥

ઉદયોડુપયોર્વ્યય સ્થિતે ગુપ્યાં પાપ નિરીક્ષિતે યમે ।
અલિ કર્કિ યુતે વિલગ્નગે સૌરે શીત કરેક્ષિતે વટે ॥ ૧૦॥

મન્દે અબ્જ ગતે વિલગ્નગે બુધ સૂર્યેન્દુ નિરીક્ષિતે ક્રમાત્ ।
ક્રીડા ભવને સુરાલયે સોખર ભૂમિષુ ચ પ્રસૂયતે ॥ ૧૧॥

નૃ લગ્નગં પ્રેક્ષ્ય કુજઃ શ્મશાને રમ્યે સિતેન્દૂ ગુરુરગ્નિહોત્રે ।
રવિર્નરેન્દ્રામરગો કુલેષુ શિલ્પાલયે જ્ઞઃ પ્રસવં કરોતિ ॥ ૧૨॥

રાશ્યંશ સ માન ગોચરે માર્ગે જન્મ ચરે સ્થિરે ગૃહે ।
સ્વઋક્ષાંશ ગતે સ્વ મન્દિરે બલયોગાત્ ફલમ્ અંશકઋક્ષયોઃ ॥ ૧૩॥

આરાર્કજયોસ્ત્રિકોણગે ચન્દ્રે અસ્તે ચ વિસૃજ્યતે અંબયા ।
દૃષ્ટે અમરરાજ મન્ત્રિણા દીર્ઘાયુઃ સુખ ભાક્ ચ સ સ્મૃતઃ ॥ ૧૪॥

પાપેક્ષિતે તુહિનગાવુદયે કુજે અસ્તે ત્યક્તો વિનશ્યતિ કુજાર્કજયોસ્તથાયે ।
સૌમ્યે અપિ પશ્યતિ તથા વિધ હસ્તમ્ એતિ સૌમ્યેતરેષુ પર હસ્ત ગતોઽપ્યનાયુઃ ॥ ૧૫॥

પિતૃમાતૃગૃહેષુ તદ્બલાત્ તરુ શાલાદિષુ નીચગૈઃ શુભઃ ।
યદિ નૈક ગતૈસ્તુ વીક્ષિતૌ લગ્નેન્દૂ વિજને પ્રસૂયતે ॥ ૧૬॥

મન્દઋક્ષાંશે શશિનિ હિબુકે મન્દદૃષ્ટે અબ્જગે વા ।
તદ્ યુક્તે વા તમસિ શયને નીચ સંસ્થૈશ્ચ ભૂમૌ ।
યદ્ વદ્ રાશિર્વ્રજતિ હરિજં ગર્ભ મોક્ષસ્તુ તદ્વત્ પાપૈશ્ચન્દ્રાત્
સ્મર સુખ ગતૈઃ ક્લેશમ્ આહુર્જનન્યાઃ ॥ ૧૭॥

સ્નેહઃ શશાઙ્કાદ્ ઉદયાચ્ચ વર્તિર્દીપોઽર્કયુક્તઋક્ષ વશાચ્ચરાદ્યઃ ।
દ્વારં ચ તદ્વાસ્તુનિ કેન્દ્ર સંસ્થૈર્જ્ઞેયં ગ્રહૈઃ વીર્ય સમન્વિતૈર્વા ॥ ૧૮॥

જીર્ણં સંસ્કૃતમ્ અર્કજે ક્ષિતિ સુતે દગ્ધં નવં શીતગૌ કાષ્ઠાઢ્યં
ન દૃઢં રવૌ શશિ સુતે તન્ નૈક શિલ્પ્યુદ્ભવમ્ રમ્યમ્ ।
ચિત્રયુતં નવં ચ ભૃગુજે જીવે દૃઢં મન્દિરં ચક્રસ્થૈશ્ચ
યથોપદેશરચનાં સામન્ત પૂર્વાં વદેત્ ॥ ૧૯॥

મેષ કુલીર તુલાલિ ગટૈઃ પ્રાગુત્તરતો ગુરુ સૌમ્ય ગૃહેષુ ।
પશ્ચિમતશ્ચ વૃષેણ નિવાસો દક્ષિણ ભાગ કરૌ મૃગ સિંહૌ ॥ ૨૦॥

પ્રાચ્યાદિ ગૃહે ક્રિયાદયો દ્વૌ દ્વૌ કોણ ગતા દ્વિ મૂર્તયઃ ।
શય્યાસ્વપિ વાસ્તુ વદ્ વદેત્ પાદૈઃ ષટ્ ત્રિ નવાન્ત્ય સંસ્થિતૈઃ ॥ ૨૧॥

ચન્દ્ર લગ્નાન્તર ગતૈર્ગ્રહૈઃ સ્યુરુપસૂતિકાઃ ।
બહિરન્તર ચક્રાદ્ અર્ધે દૃશ્યાદ્ઽ્શ્યે અન્યથા પરૈઃ ॥ ૨૨॥

લગ્ન નવાંશપ તુલ્ય તનુઃ સ્યાદ્ વીર્યયુત ગ્રહ તુલ્ય વપુર્વા ।
ચન્દ્ર સમેત નવાંશપ વર્ણઃ કાદિ વિલગ્ન વિભક્ત ભ ગાત્રઃ ॥ ૨૩॥

કં દૃક્ શ્રોત્ર નસા કપોલ હનવો વક્ત્રં ચ હોરાદયસ્તે
કણ્ઠાંસક બાહુ પાર્શ્વ હૃદય ક્રોડાનિ નાભિસ્તતઃ ।
બસ્તિઃ શિશ્ન ગુદે તતશ્ચ વૃષણાવૂરૂ તતો જાનુની ।
જઙ્ઘાઙ્ઘ્રીત્યુભયત્ર વામમ્ ઉદિતૈર્દ્રેષ્કાણ ભાગૈસ્ત્રિધા ॥ ૨૪॥

તસ્મિન્ પાપયુતં વ્રણે શુભયુતે દૃષ્ટે ચ લક્ષ્માદિશેત્
સ્વત્રઋક્ષાંશે સ્થિર સંયુતેષુ સહજઃ સ્યાદ્ અન્યથાઙ્ગતુકઃ ।
મન્દેશ્માનિલજોઽગ્નિ શાસ્ત્ર વિષજો ભૌમે બુધે ભૂ ભવઃ સૂર્યે કાષ્ઠ

ચતુષ્પદેન હિમગૌ શ ृઙ્ગ્યબ્જજોઽન્યૈઃ શુભમ્ ॥ ૨૫॥

સમનુપતિતા યસ્મિન્ ભાગે ત્રયઃ સ બુધા ગ્રહા ભવતિ નિયમાત્ તસ્યાવાપ્તિઃ શુભેષ્વશુભેષુ વા ।
વ્રણ કૃદ્ અશુભઃ ષષ્ઠે દેહે તનોર્ભ સમાશ્રિતે તિલકમ્
અશકૃદ્ દૃષ્ટઃ સૌમ્યૈર્યુતશ્ચ સ લક્ષ્મવાન્ ॥ ૨૬॥

---

ષષ્ટોઽધ્યાયઃ

અરિષ્ટ

સંધ્યાયાં હિમ દીધિતિ હોરા પાપૈર્ભાન્ત ગતૈર્નિધનાય ।
રત્યેકં શશિ પાપ સમેતૈઃ કેન્દ્રૈર્વા સ વિનાશમ્ ઉપૈતે ॥ ૧॥

ચક્રસ્ય પૂર્વાપર ભાગગેષુ ક્રૂરેષુ સૌમ્યેષુ ચ કીટ લગ્ને ।
ક્ષિપ્રં વિનાશં સમુપૈતિ જાતઃ પપૈર્વિલગ્નાસ્તમયાભિતશ્ચ ॥ ૨॥

પાપાવુદયાસ્ત ગતૌ ક્રૂરેણયુતશ્ચ શશી ।
દૃષ્ટશ્ચ શુભૈર્ન યદા મૃત્યુશ્ચ ભવેદ્ અચિરાત્ ॥ ૩॥

ક્ષીણે હિમગૌ વ્યયગૌ પાપૈરુદયાષ્ટમગૈઃ ।
કેન્દ્રેષુ શુભાશ્ચ ન ચેત્ ક્ષિપ્રં નિધનં પ્રવદેત્ ॥ ૪॥

ક્રૂરેણ સંયુતઃ શશી સ્મરાન્ત્ય મૃત્યુ લગ્નગઃ ।
કણ્ટકાદ્ બહિઃ શુભૈરવીક્ષિતશ્ચ મૃત્યુદઃ ॥ ૫॥

શશિન્ચરિ વિનાશગે નિધનમ્ આશુ પાપેક્ષિતે શુભૈરથ સમાષ્ટકદલમ્ અતશ્ચ મિશ્રૈઃ સ્થિતિઃ ।
અસદ્ભિરવલોકિતે બલિભિરત્ર માસં શુભે કલત્ર સહિતે ચ પાપ વિજિતે વિલગ્નાધિપે ॥ ૬॥

લગ્ને ક્ષીણે શશિનિ નિધનં રન્ધ્ર કેન્દ્રેષુ પાપૈઃ
પાપાન્તસ્થે નિધન હિબુક દ્યૂન સંસ્થે ચ ચન્દ્રે
એવં લગ્ને ભવતિ મદન ચ્છિદ્ર સંસ્થૈશ્ચ પાપૈર્માત્રા સાર્દ્ધં
યદિ ન ચ શુભૈર્વીક્ષિતઃ શક્તિ ભ્र्द्भिः ॥ ૭॥

રાશ્યન્તગે સદ્ભિરવીક્ષ્યમાણે ચન્દ્રે ત્રિકોણોપગતૈશ્ચ પાપૈઃ ।
પ્રાણૈઃ પ્રયાત્યાશુ શિશુર્વિયોગમ્ અસ્તે ચ પાપૈસ્તુહિનાંશુ લગ્ને ॥ ૮॥

અશુભ સહિતે ગ્રસ્તે ચન્દ્રે કુજે નિધનાશ્રિતે જનનિ સુતયોર્મૃત્યુર્લગ્ને રવૌ તુ સ શસ્ત્રજઃ ।
ઉદયતિ રવૌ શીતાંશૌ વા ત્રિકોણ વિનાશગૈર્નિધનમ્ અશુભૈર્વીર્યોપેતૈઃ શુભૈર્ન યુતેક્ષિતે ॥ ૯॥

અસિતરવિ શશાઙ્ક ભૂમિજૈર્વ્યય નવમોદય નૈધનાશ્રિતૈઃ ।

ભવતિ મરણમ્ આશુ દેહિનાં યદિ બલિના ગુરુણા ન વીક્ષિતાઃ ॥ ૧૦॥

સુત મદન નવાન્ત્ય લગ્નરન્ધ્રેષ્વશુભયુતો મરણાય શીતરશ્મિઃ ।
ભૃગુસુત શશિપુત્ર દેવપૂજ્યૈર્યદિ બલિભિર્ન યુતોऽવલોકિતો વા ॥ ૧૧॥

યોગે સ્થાનં ગતવતિ બલિનશ્ચન્દ્રે સ્વં વા તનુ ગૃહમ્ અથ વા ।
પાપૈર્દૃષ્ટે બલવતિ મરણં વર્ષસ્યાન્તઃ કિલ મુનિ ગદિતમ્ ॥ ૧૨॥

---

સપ્તમોऽધ્યાયઃ

આયુર્દાય

મય યવન મણિત્થ શક્તિ પૂર્વૈર્દિવસ કરાદિષુ વત્સરાઃ પ્રદિષ્ટાઃ ।
નવ તિથિ વિષયાશ્વિ ભૂતરુદ્રદશ સહિતા દશભિઃ સ્વ તુઙ્ગ ભેષુ ॥ ૧॥

નીચે અતોऽર્ધં હ્રસતિ હિ તતશ્ચાન્તરસ્થે અનુપાતો હોરા ત્વંશ પ્રતિમમ્ અપરે રાશિ તુલ્યં વદન્તિ ।
હિત્વા વક્રં રિપુ ગ્રહ ગતૈર્હીયતે સ્વ ત્રિ ભાગઃ સૂર્યોચ્છિન્નદ્યુતિષુ
ચ દલં પ્રોજ્હ્ય શુક્રાર્ક પુત્રૌ ॥ ૨॥

સર્વાર્ધ ત્રિ ચરણ પઞ્ચ ષષ્ટ ભાગાઃ ક્ષીયન્તે વ્યય ભવનાદ્ અસત્સુ વામમ્ ।
સત્સ્વર્ધં હ્રસતિ તથાઇકરાશિગાનામ્ એકાંશં હરતિ બલી તથાહ સત્યઃ ॥ ૩॥

સાર્ધોદિતોદિત નવાંશ હતાત્ સમસ્તાદ્ ભાગોऽષ્ટયુક્ત શત સંખ્યમ્ ઉપૈતો નાશમ્ ।
ક્રૂરે વિલગ્ન સહિતે વિધિના ત્વનેન સૌમ્યેક્ષિતે દલમ્ અતઃ પ્રલયં પ્રયાતિ ॥ ૪॥

સમા ષષ્ટિર્દ્વિઘ્ના મનુજ કરિણાં પજ઼્ચ ચ નિશા હયાનાં
દ્વાત્રિંશત્ ખર કરભયોઃ પઞ્ચક કૃતિઃ ।
વિરૂપા સાપ્યાયુર્વૃષ મહિષયોર્દ્વાદશ શુનાં સ્મૃતં છાગાદીનાં
દશક સહિતાઃ ષટ્ ચ પરમ ॥ ૫॥

અનિમિષ પરમાંશકે વિલગ્ને શશિ તનયે ગવિ પજ઼્ચ વર્ગ લિપ્તે ।
ભવતિ હિ પરમાયુષઃ પ્રમાણં યદિ સકલઃ સહિતાઃ સ્વ તુઙ્ગ ભેષુ ॥ ૬॥

આયુર્દાયં વિષ્ણુ ગુપ્તોऽપિ ચૈવં દેવ સ્વામી સિદ્ધસેનશ્ચ ચક્રે ।
દોષશ્ચૈષાં જાયતે અષ્ટાવરિષ્ટં હિત્વા નાયુર્વિંશતેઃ સ્યાદ્ અધસ્તાત્ ॥ ૭॥

યસ્મિન્ યોગે પૂર્ણમ્ આયુઃ પ્રદિષ્ટં તસ્મિન્ પ્રોક્તં ચક્ર વર્તિત્વમ્ અન્યૈઃ
પ્રત્યક્ષોऽયં દોષઃ પરોऽપિ જીવત્યાયુઃ પૂર્ણમ્ અર્થૈર્વિનાપિ ॥ ૮॥

સ્વમતેન કિલાહ જીવ શર્મા ગ્રહદાયં પરમાયુસઃ સ્વરાંશમ્ ।

ગ્રહ ભુક્ત નવાંશરાશિ તુલ્યં બહુ સામ્યં સમુપૈતિ સત્ય વાક્યમ્ ॥ ૯॥

સત્યોક્તે ગ્રહમ્ ઇષ્ટં લિપ્રી કૃત્વા શતદ્વયેનાપ્તમ્ ।
મણ્ડલ ભાગ વિશુદ્ધે અબ્દાઃ સ્યુઃ શેષાત્ તુ માસાદ્યાઃ ॥ ૧૦॥

સ્વ તુઙ્ગ વક્રોપગતૈસ્ત્રિસંગુણં દ્વિરુત્તમ સ્વાંશક ભ ત્રિભ્હાગગૈઃ ।
ઇયાન્ વિશેષસ્તુ ભદત્ત ભાષિતે સ માનમ્ અન્યત્ પ્રથમે અપ્યુદીરિતમ્ ॥ ૧૧॥

કિં ત્વત્ર ભાંશ પ્રતિમં દદાતિ વીર્યાન્વિતારાશિ સમં ચ હોરા ।
ક્રૂરોદયે ચ ઉપચયઃ સ નાત્ર કાર્યં ચ નાબ્દૈઃ પ્રથમોપદિષ્ટૈઃ ॥ ૧૨॥

સત્યોપદેશો વરમ્ અત્ર કિન્તુ કુર્વન્ત્યયોગ્યં બહુ વર્ગણાભિઃ ।
આચાર્યકત્વં ચ બહુ ઘ્નતાયામ્ એકં તુ યદ્ ભૂરિ તદેવ કાર્યમ્ ॥ ૧૩॥

ગુરુ શશિ સહિતે કુલીર લગ્ને શશિ તનયે ભૃગુજે ચ કેન્દ્રયાતે ।
ભવરિપુ સહજોપગૈશ્ચ શેષૈરમિતમ્ ઇહાયુરનુક્રમાદ્ વિના સ્યાત્ ॥ ૧૪॥

---

અષ્ટમોઽધ્યાયઃ

દશાન્તર્દશા

ઉદયરવિ શશાઙ્ક પ્રાણિ કેન્દ્રાદિ સંસ્થાઃ ।
પ્રથમ વયસિ મધ્યે અન્ત્યે ચ દદ્યુઃ ફલાનિ ।
ન હિ ન ફલ વિપાકઃ કેન્દ્ર સંસ્થાદ્ય ભાવે ભવતિ હિ ફલ પક્તિઃ પૂર્વમ્ આપોક્લિમે અપિ ॥ ૧॥

આયુઃ કૃતં યેન હિ યત્ તદેવ કલ્પ્યા દશ સા પ્રબલસ્ય પૂર્વામ્ ।
સામ્યે બહૂનાં બહુ વર્ષદસ્ય તેષાં ચ સામ્યે પ્રથમોદિતસ્ય ॥ ૨॥

એકઋક્ષગોઽર્ધમ્ અપહૃત્ય દદાતિ તુ સ્વં ત્ર્યંશં ત્રિકોણ ગૃહગઃ સ્મરગઃ સ્વરાંશમ્ ।
પાદં ફલસ્ય ચતુરસ્ર ગતઃ સ હોરસ્ત્વેવં પરસ્પર ગતાઃ પરિપાચયન્તિ ॥ ૩॥

સ્થાનાન્યથાઇતાનિ સ વર્ણયિત્વા સર્વાણ્યધશ્છેદ વિવર્જિતાનિ ।
દશાબ્દ પિણ્ડે ગુણકા યથાંશં છેદસ્તદૈક્યેન દશાપ્રભેદઃ ॥ ૪॥

સમ્યગ્ બલિનઃ સ્વ તુઙ્ગ ભાગે સમ્પૂર્ણા બલ વર્જિતસ્યરિક્તા ।
નીચાંશ ગતસ્ય શત્રુ ભાગે જ્ઞેયાનિષ્ટ ફલાદશા પ્રસૂતૌ ॥ ૫॥

ભ્રષ્ટસ્ય તુઙ્ગાદ્ અવરોહિ સંજ્ઞા મધ્યા ભવેત્ સા સુહૃદ્ ઉચ્ચ ભાગે ।
અરોહિણી નિમ્ન પરિચ્યુતસ્ય નીચારિ ભાંશેષ્વધમા ભવે સા ॥ ૬॥

નીચારિ ભાંશે સમવસ્થિતસ્ય શસ્તે ગૃહે ગૃહે મિશ્ર ફલા પ્રદિષ્ટા ।

સંજ્ઞાનુરૂપાણિ ફલાન્યથૈષાં દશાસુ વક્ષ્યામિ યથોપયોગમ્ ॥ ૭॥

ઉભયે અધમ મધ્ય પૂજિતાદ્રેષ્કાણૈશ્ચર ભેષુ ચ ઉત્ક્રમાત્ ।
અશુભેષ્ટ સમાઃ સ્થિરે ક્રમાદ્ ધોરાયાઃ પરિકલ્પિતાદશા ॥ ૮॥

એકં દ્વૌ નવ વિંશતિર્ધૃતિ કૃતી પઞ્ચાશદ્ એષાં
ક્રમાચ્ચન્દ્રારેન્દુજ શુક્ર જીવદિનક્રિદ્ દૈવા કરિણાં સમાઃ ।
સ્વૈઃ સ્વૈઃ પુષ્ટ ફલાનિ સર્ગ જનિતૈઃ પક્તિર્દશાયાઃ ક્રમાદ્ અન્તે
લગ્નદશા શુભેતિ યવના નેચ્છન્તિ કેચિત્ તથા ॥ ૯॥

પાક સ્વામિનિ લગ્નગે સુહૃદિ વા વર્ગે અસ્ય સૌમ્યે અપિ વા
પ્રારબ્ધા શુભદાદશા ત્રિદશ ષડ્ લાભેષુ વા પાકપે ।
મિત્રોચ્ચોપચયસ્ત્રિકોણ મદને પાકેશ્વરસ્ય સ્થિતશ્ચન્દ્રઃ
સત્ ફલ બોધનાનિ કુરુતે પાપાનિ ચાતોઽન્યથા ॥ ૧૦॥

પ્રારબ્ધા હિમગૌ દશા સ્વ ગૃહગે માનાર્થ સૌખ્યાવહા કૌજે
દૂષયતિ સ્ત્રિયં બુધ ગૃહે વિદ્યા સુહૃદ્ વિત્તદા ।
દુર્ગારણ્ય પથાલયે કૃષિ કરી સિંહે સિતઋક્ષે અન્નદા કુસ્ત્રીદા
મૃગ કુમ્ભયોર્ગુરુ ગૃહે માનાર્થ સૌખ્યાવહા ॥ ૧૧॥

સૌર્યાં સ્વન્ નખદન્ત ચર્મ કનક ક્રૌર્યાધ્વ ભૂપાહવૈસ્તક્ષ્ણ્યં
દૈર્યમ્ અજસ્રમ્ ઉદ્યમરતિઃ ખ્યાતિઃ પ્રતાપોન્નતિઃ ।
ભાર્ય પુત્રધનારિ શસ્ત્ર હુતભુગ્ ભૂપોદ્ભવા વ્યાપદ સ્ત્યાગી
પાપરતિઃ સ્વ ભૃત્ય કલહો હૃત્ ક્રોડ પીડામયાઃ ॥ ૧૨॥

ઇન્દોઃ પ્રાપ્યદશાં ફલાનિ લભતે મન્ત્રદ્વિજાત્યુદ્ભવનીક્ષુ ક્ષીર
વિકાર વસ્ત્ર કુસુમ ક્રીડા તિલાન્ન શ્રમૈઃ ।
નિદ્રાલસ્ય મૃદુ દ્વિજામરરતિઃ સ્ત્રી જન્મ મેધાવિતા
કીર્ત્યર્થોપચક્ષયૌ ચ બલિભિર્વૈરં સ્વ પક્ષેણ ચ ॥ ૧૩॥

ભૌમસ્યારિ વિમર્દ ભૂપ સહજ ક્ષિત્યાવિકાજૈર્ધનં પ્રદ્વેષઃ
સુત મિત્રદાર સહજૈર્વિદ્વદ્ ગુરુ દ્વેષ્ટતા ।
તૃષ્ણાસૃગ્ જ્વર પિત્ત ભઙ્ગ જનિતારોગાઃ પર સ્ત્રી કૃતાઃ પ્રીતિઃ
પાપરતૈરધર્મ નિરતિઃ પારુષ્ય તૈક્ષ્ણ્યાનિ ચ ॥ ૧૪॥

બૌધ્યાં દૌત્ય સુહૃદ્ ગુરુ દ્વિજધનં વિદ્વત્ પ્રશંસા
યશો યુક્તિ દ્રવ્ય સુવર્ણ વેસર મહી સૌભાગ્ય સૌખ્યામયઃ ।

હાસ્યોપાસન કૌશલં મતિ ચયો ધર્મ ક્રિયા સિદ્ધયઃ
પારુષ્યં શ્રમ બન્ધ માનસ શુચઃ પીડા ચ ધાતુ ત્રયાત્ ॥ ૧૫॥

જૈવ્યાં માન ગુણોદયો મતિ ચયઃ કાન્તિઃ પ્રતાપોન્નતિર્માહાત્મ્યોદ્યમ
મન્ત્ર નીતિ નૃ પતિ સ્વાધ્યાય મન્ત્રૈર્ધનમ્ ।
હેમાશ્વાત્મજ કુઞ્જરામ્બર ચયઃ પ્રીતિશ્ચ સદ્ ભૂમિપૈઃ ।
સૂક્ષ્મ્યોહ ગહનાશ્રમઃ શ્રવણરુગ્ વૈરં વિધર્માશ્રિતૈઃ ॥ ૧૬॥

શૌક્યાં ગીતરતિઃ પ્રમોદ સુરભિ દ્રવ્યાન્ન પાનામ્બર સ્ત્રી રત્ન
દ્યુતિ મન્મથોપકરણ જ્ઞાનેષ્ટ મિત્રાગમાઃ ।
કૌશલ્યં ક્રય વિક્રયે કૃષિ નિધિ પ્રાપ્તિર્ધનસ્યાગમો ।
વૃન્દોર્વીશ નિષાદધર્મરહિતૈર્વૈરં શુચઃ સ્નેહતઃ ॥ ૧૭॥

સૌરીં પ્રાપ્ય ખરોષ્ટ્ર પક્ષિ મહિષી વૃદ્ધાઙ્ગનાવાપ્તયઃ ।
શ્રેણી ગ્રામ પુરધિ કાર જનિતા પૂજા કુધાન્યાગમઃ ।
શ્લેષ્મેર્ષ્યાનિલ કોપ મોહ મલિન વ્યાપત્તિ તન્દ્રાશ્રમાન્ ।
ભૃત્યાપત્ય કલત્ર ભર્ત્સનમ્ અપિ પ્રાપ્નોતિ ચ વ્યઙ્ગયતામ્ ॥ ૧૮॥

દશાસુ શસ્તાસુ શુભાનિ કુર્વન્ત્યનિષ્ટ સંજ્ઞા સ્વ શુભાનિ ચૈવમ્ ।
મિશ્રાસુ નિશ્રાણિ દશા ફલાનિ હોરા ફલં લગ્ન પતેઃ સ માનમ્ ॥ ૧૯॥

સંજ્ઞાધ્યાયે યસ્ય યદ્ રવ્ય મુક્તં કર્માજીવો યશ્ચ યસ્યોપદિષ્ટઃ ।
ભાવ સ્થાનાલોક યોગોદ્ભવં ચ તત્ તત્ સર્વં તસ્ય યોજ્યં દશાયામ્ ॥ ૨૦॥

છાયાં મહાભૂત કૃતાં ચ સર્વે અભિવ્યઞ્જયન્તિ સ્વદશામ્ અવાપ્ય ।
ક્ષ્વમ્બ્વગ્નિ વાય્વમ્બરજાન્ ગુણાંશ્ચ નાસાસ્ય દૃક્ ત્વક્ છ્રવણાનુમેયાત્ ॥ ૨૧॥

શુભ ફલદદશાયા તાદૃગ્ એવાન્તરાત્મા બહુ જનયતિ પુંસાં સખ્યમ્ અર્થાગમં ચ
કથિત ફલ વિપાકૈસ્તર્કયેદ્ વર્તમાનાં પરિણમતિ ફલાપ્તિઃ સ્વપ્ન ચિન્તા સ્વ વીર્જૈઃ ॥ ૨૨॥

એક ગ્રહસ્ય સદૃશે ફલયોર્વિરોધે નાશં વદેદ્ યદ્ અધિકં પરિપચ્યતે તત્ ।
નાન્યો ગ્રહઃ સદૃશમ્ અન્ય ફલં હિનસ્તિ સ્વાં સ્વાં દશામ્ ઉપગતાઃ સ ફલ પ્રદા સ્યુઃ ॥ ૨૩॥

---

નવમોઽધ્યાયઃ

અષ્ટકવર્ગ

સ્વાદ્ અર્કઃ પ્રથમાય બન્ધુ નિધન દ્વ્યાજ્ઞા તપો દ્યૂનગો વક્રાત્
સ્વાદ્ ઇવ તદ્વદ્ એવરવિજાચ્છુક્રાત્ સ્મરાન્ત્યારિષુ ।

જીવાદ્ ધર્મ સુતાય શત્રુષુ દશ ત્ર્યાયારિગઃ શીતગોરેષ્વેવાન્ત્ય
તપઃ સુતેષુ ચ બુધાલ્ લગ્નાત્ સ બન્ધ્વન્ત્યગઃ ॥ ૧॥

લગ્નાત્ ષટ્ ત્રિ દશાયગઃ સ ધન ધી ધર્મેષુ ચારાચ્છશી સ્વાત્
સાસ્તાદિષુ સાષ્ટ સપ્તસુ રવેઃ ષટ્ ત્ર્યાય ધીસ્થો યમાત્ ।
ધી ત્ર્યાયાષ્ટમ કણ્ટકેષુ શશિજાજ્ જીવાદ્ વ્યયાયાષ્ટગઃ કેન્દ્રસ્થશ્ચ
સિતાત્ તુ ધર્મ સુખધી ત્ર્યાયાસ્પદાનઙ્ગગઃ ॥ ૨॥

વક્રસ્તૂપચયેષ્વિનાત્ સ તનયેષ્વાદ્યાધિકેષૂદયાચ્ ।
ચન્દ્રાદ્ દિગ્ વિફલેષુ કેન્દ્ર નિધન પ્રાસ્યર્થગઃ સ્વાચ્છુભઃ ।
ધર્માયાષ્ટમ કેન્દ્રગોऽર્ક તનયાજ્ જ્ઞાત્ ષટ્ ત્રિ ધી લાભગઃ ।
શુક્રાત્ ષડ્ વ્યય લાભ મ્ર્ત્યુષુ ગુરોઃ કર્માન્યલાભારિષુ ॥ ૩॥

દ્વ્યાદ્યાયાષ્ટ તપઃ સુખેષુ ભૃગુજાત્ સ ત્ર્યાત્મજેષ્વિન્દુજઃ
સાજ્ઞાસ્તેષુ યમારયોર્વ્યયરિપુ પ્રાસ્યષ્ટગો વાક્ પતેઃ ।
ધર્માયારિ સુત વ્યયેષુ સવિતુઃ સ્વાત્ સાદ્ય કર્મ ત્રિગઃ ષટ્
સ્વાયાષ્ટ સુખાસ્પદેષુ હિમગોઃ સાદ્યેષુ લગ્નાચ્છુભઃ ॥ ૪॥

દિક્ સ્વાદ્યાષ્ટમદાય બન્ધુષુ કુજાત્ સ્વાત્ ત્રિકેષ્વઙ્ગિરાઃ સૂર્યાત્
સત્રિ નવેષુ ધી સ્વ નવદિગ્ લાભારિગો ભાર્ગવાત્ ।
જાયાયરથ નવાત્મજેષુ હિમગોર્મન્દાત્ ત્રિ ષડ્ ધી વ્યયે દિગ્ ધી
ષટ્ સ્વ સુખાય પૂર્વ નવગો જ્ઞાત્ સ સ્મરશ્ચ ઉદયાત્ ॥ ૫॥

લગ્નાદ્ આ સુત લાભરન્ધ્ર નવગઃ સાન્ત્યઃ શશાङ्कાત્ સિતઃ
સ્વાત્ સાજ્ઞેષુ સુખ ત્રિ ધી નવદશ ચ્છિદ્રાપ્તિગઃ સૂર્યજાત્ ।
રન્ધ્રાય વ્યગો રવેર્નવદશ પ્રાસ્યષ્ટધીસ્થો ગુરોર્જ્ઞાદ્
ધી ત્ર્યાય નવારિગસ્ત્રિ નવ ષટ્ પુત્રાયસાન્ત્યઃ કુજાત્ ॥ ૬॥

મન્દ સ્વાત્ ત્રિ સુતાય શત્રુષુ શુભઃ સાજ્ઞાન્ત્યગો ભૂમિજાત્
કેન્દ્રાયાષ્ટધનેષ્વિનાદ્ ઉપચયેષ્વાદ્યે સુખે ચ ઉદયાત્ ।
ધર્માયારિ દશાન્ત્ય મૃત્યુષુ બુધાચ્ચન્દ્રાત્ ત્રી ષડ્ લાભગઃ
ષષ્ઠાયાન્ત્ય ગતઃ સિતાસ્સુર ગુરોઃ પ્રાસ્યન્ત્યધી શત્રુષુ ॥ ૭॥

ઇતિ નિગદિતમ્ ઇષ્ટં નેષ્ટમ્ અન્યદ્ વિશેષાદ્ અધિક ફલ વિપાકં જન્મ ભાત્ તત્રદધ્યુઃ ।
ઉપચય ગૃહ મિત્ર સ્વોચ્ચગૈઃ પુષ્ટમ્ ઇષ્ટં અવપચય ગૃહ નીચારાતિગૈર્નેષ્ટ સમ્પત્ ॥ ૮॥

દશમોઽધ્યાયઃ

કર્માજીવ

અર્થાપ્તિઃ પિતૃ પિતૃ પત્નિ શત્રુ મિત્ર ભ્રાતૃ સ્ત્રી મૃતક જનાદ્ દિવાકરાદ્યૈઃ ।
હોરેન્દ્વોર્દશમ ગતૈર્વિકલ્પનીયા ભેન્દ્વર્કાસ્પદ પતિગાંશ નાથ વૃત્ત્યા ॥ ૧॥

અર્કાંશે તૃણ કનકાર્ણ ભેષજાદ્યૈશ્ચન્દ્રાંશે કૃષિ જલજાઙ્ગનાશ્રયાચ્ચ ।
ધાત્વગ્નિ પ્રહરણ સાહસૈઃ કુજાંશે સૌમ્યાંશે લિપિ ગણિતાદિ કાવ્ય શિલ્પૈઃ ॥ ૨॥

જીવાંશે દ્વિજ વિબુધાકરાદિ ધર્મૈઃ કાવ્યાંશે મણિ રજતાદિ ગો મહિષ્યૈઃ ।
સૌરાંશે શ્રમ વધ ભાર નીચ શિલ્પૈઃ કર્મેશાધ્યુષિત નવાંશ કર્મ સિદ્ધિઃ ॥ ૩॥

મિત્રારિ સ્વ ગૃહ ગતૈર્ગ્રહૈસ્તતોઽર્થં તુઙ્ગસ્થે બલિનિ ચ ભાસ્કરે સ્વ વીર્યાત્ ।
આયસ્થૈરુદયધનાશ્રિતૈશ્ચ સૌમ્યૈઃ સંચિન્ત્યં બલ સહિતૈરનેકધા સ્વમ્ ॥ ૪॥

---

એકાદશમોઽધ્યાયઃ

રાજયોગ

પ્રાહુર્યવનાઃ સ્વ તુઙ્ગગૈઃ ક્રૂરૈઃ ક્રૂર મતિર્મહીપતિઃ ।
ક્રૂરૈસ્તુ ન જીવ શર્મણઃ પક્ષે ક્ષિત્યધિપઃ પ્રજાયતે ॥ ૧॥

વક્રાર્કજાર્ક ગુરુભિઃ સકલૈસ્ત્રિભિશ્ચ સ્વોચ્ચેષુ ષોડશ નૃપાઃ કથિતૈકલગ્ને ।
દ્વ્યેકાશ્રિતેષુ ચ તથાઇકતમે વિલગ્ને સ્વ ક્ષેત્રગે શશિનિ ષોડશ ભૂમિપાઃ સ્યુઃ ॥ ૨॥

વર્ગોત્તમ ગતે લગ્ને ચન્દ્રે વા ચન્દ્ર વર્જિતઃ ।
ચતુરાદ્યૈર્ગ્રહૈર્દૃષ્ટે નૃપા દ્વાવિંશતિઃ સ્મૃતાઃ ॥ ૩॥

યમે કુમ્ભે અર્કે અજે ગવિ શશિનિ તૈરેવ તનુગૈર્નૃ યુક્તિં સહાલિસ્થૈઃ શશિજ ગુરુ વક્રૈર્નૃ પતયઃ ।
યમેન્દૂ તુઙ્ગે અઙ્ગે સવિતૃ શશિજૌ ષષ્ઠ ભવને તુલાજેન્દુ ક્ષેત્રૈઃ સ સિત કુજ જીવૈશ્ચ નરપૌ ॥ ૪॥

કુજે તુઙ્ગે અર્કેન્દ્વોર્ધનુષિ યમ લગ્ને ચ કુપતિઃ પતિર્ભૂમેશ્ચાન્યઃ ક્ષિતિ સુત વિલગ્ને સ શશિનિ ।
સ ચન્દ્રે સૌરે અસ્તે સુર પતિ ગુરૌ ચાપ ધરગે સ્વ તુઙ્ગસ્થે ભાનાવુદયમ્ ઉપયાતે ક્ષિતિ પતિઃ ॥ ૫॥

વૃષે સેન્દૌ લગ્ને સવિતૃ ગુરુ તીક્ષ્ણાંશુ તનયૈઃ સુહૃજ્ જાયા ખસ્થૈર્ભવતિ નિયમાન્ માનવ પતિઃ ।
મૃગે મન્દે લગ્ને સહજરિપુ ધર્મ વ્યય ગતૈઃ શશાઙ્કાદ્યૈઃ ખ્યાતઃ પૃથુ ગુણયશાઃ પુઙ્ગલ પતિઃ ॥ ૬॥

હયે સેન્દૌ જીવે મૃગ મુખ ગતે ભૂમિ તનયે સ્વ તુઙ્ગસ્થૌ લગ્ને ભૃગુજ શશિજાવત્ર નૃ પતી ।
સુતસ્થૌ વક્રાર્કી ગુરુ શશિ સિતાશ્ચાપિ હિબુકે બુધે કન્યા લગ્ને ભવતિ હિ નૃપોઽન્યોઽપિ ગુણવાન્ ॥ ૭॥

ઝષે સેન્દૌ લગ્ને ઘટ મૃગ મૃગેન્દ્રેષુ સહિતૈર્યમારાર્કૈર્યોઽભૂત્ સ ખલુ મનુજઃ શાસ્તિ વસુધામ્ ।
અજે સારે મૂર્તૌ શશિ ગૃહ ગતે ચામર ગુરૌ ।
સુરેજ્યે વા લગ્ને ધરણિ પતિરન્યોઽપિ ગુણવાન્ ॥ ૮॥

કર્કિણિ લગ્ને તત્સ્થે જીવે ચન્દ્ર સિત જ્ઞૈરાય પ્રાપ્તૈઃ ।
મેષ ગતે અર્કે જાતં વિદ્યાદ્ વિક્રમયુક્તં પૃથ્વી નાથમ્ ॥ ૯॥

મૃગ મુખે અર્ક તનયસ્તનુ સંસ્થઃ ક્રિય કુલીર હરયોઽધિપયુક્તાઃ ।
મિથુન તૌલિ સહિતૌ બુધ શુક્રૌ યદિ તદા પૃથુ યશાઃ પૃથિવીશઃ ॥ ૧૦॥

સ્વોચ્ચ સંસ્થે બુધે લગ્ને ભૃગૌ મેષૂરણાશ્રિતે ।
સ જીવે અસ્તે નિશા નાથે રાજા મન્દારયોઃ સુતે ॥ ૧૧॥

અપિ ખલ કુલ જાતા માનવારાજ્ય ભાજઃ કિમ્ ઉત નૃપ કુલોત્થાઃ પ્રોક્ત ભૂ પાલયોગૈઃ ।
નૃ પતિ કુલ સમુત્થાઃ પાર્થિવા વક્ષ્યમાણૈર્ભવતિ નૃ પતિ તુલ્યસ્તેષ્વભૂ પાલ પુત્રઃ ॥ ૧૨॥

ઉચ્ચ સ્વ ત્રિકોણગૈર્બલસ્થૈસ્ત્ર્યાદ્યૈર્ભૂ પતિ વંશજા નરેન્દ્રાઃ ।
પઞ્ચાદિભિરન્ય વંશ જાતા હીનૈર્વિત્તયુતા ન ભૂમિ પાલાઃ ॥ ૧૩॥

લેખાસ્થે અર્કે અજેન્દૌ લગ્ને ભૌમે સ્વોચ્ચે કુમ્ભે મન્દે ।
ચાપ પ્રાપ્તે જીવે રાજ્ઞઃ પુત્રં વિન્દ્યાત્ પૃથ્વી નાથમ્ ॥ ૧૪॥

સ્વઋક્ષે શુક્રે પાતાલસ્થે ધર્મ સ્થાનં પ્રાપ્તે ચન્દ્રે ।
દુશ્ચિક્યાઙ્ગ પ્રાપ્તિ પ્રાપ્તૈઃ શેષૈર્જાતઃ સ્વામી ભૂમેઃ ॥ ૧૫॥

સૌમ્યે વીર્યયુતે તનુ યુક્તે વીર્યાઢ્યે ચ શુભે શુભયાતે ।
ધર્માર્થોપચયેષ્વવશેષૈર્ધર્માત્મા નૃપજઃ પૃથિવીશઃ ॥ ૧૬॥

વૃષોદયે મૂર્તિ ધનારિ લાભગૈઃ શશાઙ્ક જીવાર્ક સુતાપરૈર્નૃપઃ ।
સુખે ગુરૌ ખે શશિ તીક્ષ્ણ દીધિતી યમોદયે લાભ ગતૈર્નૃપોઽપરૈઃ ॥ ૧૭॥

મેષૂરણાય તનુગાઃ શશિ મન્દ જીવા જ્ઞારૌ ધને સિતરવી હિબુકે નરેન્દ્રમ્ ।
વક્રાસિતૌ શશિ સુરેજ્ય સિતાર્ક સૌમ્યા હોરા સુખાસ્ત શુભ ખાપ્તિ ગતાઃ પ્રજેશમ્ ॥ ૧૮॥

કર્મ લગ્નયુત પાકદશાયાં રાજ્ય લબ્ધિરથ વા પ્રબલસ્ય ।
શત્રુ નીચ ગૃહયાતદશાયાં ચ્છિદ્ર સંશ્રયદશા પરિકલ્પ્યા ॥ ૧૯॥

ગુરુ સિત બુધ લગ્ને સપ્તમસ્થે અર્ક પુત્રે વિયતિ દિવસ નાથે ભોગિનાં જન્મ વિન્દ્યાત્ ।
શુભ બલયુત કેન્દ્રૈઃ ક્રૂર સંસ્થૈશ્ચ પાપૈર્વ્રજતિ શબરદસ્યુ સ્વામિતામ્ અર્થ ભાક્ ચ ॥ ૨૦॥

દ્વાદશોઽધ્યાયઃ

નાભસયોગ

નવ દિગ્ વસવસ્ત્રિકાગ્નિ વેદૈર્ગુણિતા દ્વિ ત્રિ ચતુર્વિકલ્પજાઃ સ્યુઃ ।
યવનૈસ્ત્રિ ગુણા હિ ષટ્ શતી સા કથિતા વિસ્તરતોઽગ્ર તત્ સમાઃ સ્યુઃ ॥ ૧॥

રજ્જુર્મુશલં નલશ્ચરાદ્યૈઃ સત્યશ્ચાશ્રયજાઞ્જ ગાદયોગાન્ ।
કેન્દ્રૈઃ સદ્ અસદ્ યુતૈર્દલાખ્યૌ સ્રક્ સર્પૌ કથિતૌ પરાશરેણ ॥ ૨॥

યોગા વ્રજન્ત્યાશ્રયજાઃ સમત્વં યવાબ્જ વજ્રાણ્ડજ ગોલકાદ્યૈઃ ।
કેન્દ્રોપગૈઃ પ્રોક્ત ફલૌ દલાખ્યાવિત્યાહુરન્યે ન પૃથક્ ફલૌ તૌ ॥ ૩॥

આસન્ન કેન્દ્ર ભવન દ્વયગૈર્ગદાખ્યસ્તન્વસ્તગેષુ શકટં વિહગઃ ખ બન્ધ્વોઃ ।
શૃઙ્ગાટકં નવમ પઞ્ચમ લગ્ન સંસ્થૈર્લગ્નાન્યગૈર્હલમ્ ઇતિ પ્રવદન્તિ તજ્ જ્ઞાઃ ॥ ૪॥

શકટાણ્ડજ વચ્છુભાશુભૈર્વજ્રં તદ્વિપરીતગૈર્યવઃ ।
કમલં તુ વિમિશ્ર સંસ્થિતૈર્વાપિ તદ્યદિ કેન્દ્ર બાહ્યતઃ ॥ ૫॥

પૂર્વ શાસ્ત્રાનુસારેણ મયા વજ્રાદયઃ કૃતાઃ ।
ચૌતુર્થે ભવને સૂર્યાજ્ જ્ઞ સિતૌ ભવતઃ કથમ્ ॥ ૬॥

કણ્ટકાદિ પ્રવૃર્ત્તૈસ્તુ ચતુર્ગૃહ ગતૈર્ગ્રહૈઃ ।
યૂપેષુ શક્તિ દણ્ડાખ્યા હોરાદ્યૈઃ કણ્ટકૈઃ ક્રમાત્ ॥ ૭॥

નૌ કૂટ ચ્છત્ર ચાપાનિ તદ્વત્ સપ્તર્ક્ષ સંસ્થિતૈઃ ।
અર્ધ ચન્દ્રસ્તુ નાવાદ્યૈઃ પ્રોક્તસ્ત્વન્યર્ક્ષ સંસ્થિતૈઃ ॥ ૮॥

એકાન્તર ગતૈરર્થાત્ સમુદ્રઃ ષડ્ ગૃહાશ્રિતૈઃ ।
વિલગ્નાદિ સ્થિતૈશ્ચક્રમ્ ઇત્યાકૃતિજ સંગ્રહઃ ॥ ૯॥

સંખ્યા યોગાઃ સ્યુઃ સપ્ત સપ્તર્ક્ષ સંસ્થિરેકાપાયાદ્ વલ્લકી દામિની ચ
પાશઃ કેદારઃ શૂલયોગો યુગં ચ ગોલશ્ચાન્યાન્ પૂર્વમ્ ઉક્તાન્ વિહાય ॥ ૧૦॥

ઈર્ષ્યુર્વિદેશ નિરતોઽધ્વરુચિશ્ચરજ્જ્વાં માની ધની ચ મુશલે બહુ કૃત્ય સક્તઃ ।
વ્યઙ્ગઃ સ્થિરાઢ્ય નિપુણો નલજઃ સ્રગ્ ઉત્થો ભોગાન્વિતો ભુજ ગજો બહુ દુઃખ ભાક્ સ્યાત્ ॥ ૧૧॥

આશ્રયોક્તાસ્તુ વિફલા ભવન્ત્યન્યૈર્વિમિશ્રિતાઃ ।
મિશ્રા યૈસ્તે ફલં દદ્યુરમિશ્રાઃ સ્વ ફલ પ્રદાઃ ॥ ૧૨॥

યજ્વર્થ ભાક્ સતતમ્ અર્થરુચિર્ગદાયાં તદ્વૃત્તિ ભુક્ શકટજઃ સરુજઃ કુદારઃ ।

દૂતોऽટનઃ કલહ કૃદ્ વિહગે પ્રદિષ્ટઃ શ‍ૃઙ્ગાટકે ચિર સુખી કૃષિકૃદ્ ધલાક્ષ્યે ॥ ૧૩॥

વજ્રે અન્ત્ય પૂર્વ સુખિનઃ સુભગોऽતિશૂરો વીર્યાન્વિતોऽપ્યથયવે સુખિતો વયોऽન્તઃ ।
વિખ્યાત કીર્ત્યમિત સૌખ્ય ગુણશ્ચ પદ્મે વાપ્યાં તનુ સ્થિર સુખો નિધિ કૃન્ ન દાતા ॥ ૧૪॥

ત્યાગાત્મવાન્ ક્રતુ વરૈર્યજતે ચ યૂપે હિંસ્રોऽથ ગુપ્ત્યધિકૃતઃ શરકૃચ્છરાખ્યે ।
નીચોऽલસઃ સુખધનૈર્વિયુતશ્ચ શક્તૌ દણ્ડે પ્રિયૈર્વિરહિતઃ પુરુષાન્ત્ય વૃત્તિઃ ॥ ૧૫॥

કીર્ત્યા યુતશ્ચલ સુખઃ કૃપણશ્ચ નૌજઃ કૂટે અનૃત પ્લવન બન્ધનપશ્ચ જાતઃ ।
છત્રોદ્ભવઃ સ્વ જન સૌખ્ય કરોऽન્ત્ય સૌખ્યઃ શૂરશ્ચ કાર્મુક ભવઃ પ્રથમાન્ત્ય સૌખ્યઃ ॥ ૧૬॥

અર્ધેન્દુજઃ સુભગ કાન્ત વપુઃ પ્રધાનસ્તોયાલયે નર પતિ પ્રતિમસ્તુ ભોગી ।
ચક્રે નરેન્દ્ર મુકુટ દ્યુતિ રઞ્જિતાઙ્ઘ્રિર્વીણોદ્ભવશ્ચ નિપુણઃ પ્રિય ગીત નૃત્યઃ ॥ ૧૭॥

દાતાન્ય કાર્ય નિરતઃ પશુપશ્ચ દામ્નિ પાશે ધનાર્જન વિશીલ સ ભૃત્ય બન્ધુઃ ।
કેદારજઃ કૃષિ કરઃ સુબહૂપયોજ્યઃ શૂરઃ ક્ષતો ધનરુચિર્વિધનશ્ચ શૂલે ॥ ૧૮॥

ધન વિરહિતઃ પાખણ્ડી વા યુગે ત્વથ ગોલકે વિધન મલિનો જ્ઞાનોપેતઃ કુશિલ્પ્યલસોऽટનઃ ।
ઇતિ નિગદિતા યોગાઃ સાર્દ્ધં ફલૈરિહ નાભસા નિયત ફલદાશ્ચિન્ત્યા હ્યેતે સમસ્તદશાસ્વપિ ॥ ૧૯॥

---

## ત્રયોદશોऽધ્યાયઃ

### ચન્દ્રયોગ

અધમ સમ વરિષ્ઠાન્યર્ક કેન્દ્રાદિ સંસ્થે શશિનિ વિનય વિત્ત જ્ઞાનધી નૈપુણાનિ ।
અહનિ નિશિ ચ ચન્દ્રે સ્વે અધિમિત્રાંશકે વા સુર ગુરુ સિતદૃષ્ટે વિત્તવાન્ સ્યાત્ સુખી ચ ॥ ૧॥

સૌમ્યૈઃ સ્મરારિ નિધનેષ્વધિયોગેન્દોસ્તસ્મિંશ્ચમૂપ સચિવ ક્ષિતિ પાલ જન્મ ।
સમ્પન્ન સૌખ્ય વિભવા હત શત્રવશ્ચ દીર્ઘાયુષો વિગતરોગ ભયાશ્ચ જાતાઃ ॥ ૨॥

હિત્વાર્કં સુનફાનફાદુરુધુરાઃ સ્વાન્ત્યોભયસ્થૈર્ગ્રહૈઃ શીતાંશોઃ કથિતોऽન્યથા તુ બહુભિઃ કેમદ્રુમોऽન્યૈસ્ત્વસૌ ।
કેન્દ્રે શીતકરેऽથ વા ગ્રહયુતે કેમદ્રુમો નેષ્યતે કેચિત્ કેન્દ્ર નવાંશકેષુ ચ વદન્ત્યુક્તિઃ પ્રસિદ્ધા ન તે ॥ ૩॥

ત્રિંશત્ સરૂપાઃ સુનફાનફાખ્યાઃ ષષ્ટિત્રયં દૌરુધુરે પ્રભેદાઃ ।
ઇચ્છા વિકલ્પૈઃ ક્રમશોऽભિનીય નીતે નિવ્ર‍ૃત્તિઃ પુનરન્ય નીતિઃ ॥ ૪॥

સ્વયમ્ અધિગત વિત્તઃ પાર્થિવસ્તત્ સમો વા ભવતિ હિ સુનફાયાં ધી ધન ખ્યાતિમાંશ્ચ ।
પ્રભુર ગદ શરીરઃ શીલવાન્ ખ્યાત કીર્તિર્વિષય સુખ સુવેષો નિર્વ્ર‍ૃતશ્ચાનફાયામ્ ॥ ૫॥

ઉત્પન્ન ભોગ સુખ ભુગ્ ધન વાહનાઢ્યસ્ત્યાગાન્વિતો દુરુધુરા પ્રભવઃ સુભૃત્યઃ ।
કેમદ્રુમે મલિનદુઃખિત નીચ નિઃસ્વાઃ પ્રેષ્યાઃ ખલાશ્ચ નૃપતેરપિ વંશ જાતાઃ ॥ ૬॥

ઉત્સાહ શૌર્યધન સાહસ વાન્ મહીજઃ સૌમ્યઃ પટુઃ સુવચનો નિપુણઃ કલાસુ ।
જીવોઽર્થધર્મ સુખ ભાઙ્ નૃપ પૂજિતશ્ચ કામી ભૃગુર્બહુ ધનો વિષયોપભોક્તા ॥ ૭॥

પર વિભવ પરિચ્છદોપભોક્તારવિ તનયો બહુ કાર્યકૃદ્ ગણેશઃ ।
અશુભ કૃદ્ ઉડુપોઽહ્નિ દૃશ્ય મૂર્તિર્ગલિત તનુશ્ચ શુભોઽન્યથાન્યદ્ ઊહ્યમ્ ॥ ૮॥

લગ્નાદ્ અતીવ વસુમાન્ વસુમાઞ્ છશાઙ્કાત્ સૌમ્ય ગ્રહૈરુપચયોપગતૈઃ સમસ્તૈઃ ।
દ્વાભ્યાં સમોઽલ્પ વસુમાંશ્ચ તદૂનતાયામ્ અન્યેષ્વસત્સ્વપિ ફલેષ્વિદમ્ ઉત્કટેન ॥ ૯॥

---

ચતુર્દશોઽધ્યાયઃ

દ્વિગ્રહયોગ

તિગ્માંશુર્જનયત્યુષેશ સહિતો યન્ત્રાશ્મ કારં નરં ભૌમેનાઘરતં બુધેન નિપુણં ધી કીર્તિ સૌખ્યાન્વિતમ્ ।
ક્રૂરં વાક્ પતિનાન્ય કાર્ય નિરતં શુક્રેણરઙ્ગાયુધૈર્લબ્ધસ્વં રવિજેનધાતુ કુશલં ભાણ્ડ પ્રકારેષુ વા ॥ ૧॥

કૂટ સ્ત્ર્યાસવ કુમ્ભ પણ્યમ્ અશિવં માતુઃ સ વક્રઃ શશી સ જ્ઞઃ પ્રશ્રિત વાક્યમ્ અર્થ નિપુણં સૌભાગ્ય કીર્ત્યાન્વિતમ્ ।
વિક્રાન્તં કુલ મુખ્યમ્ અસ્થિર મતિં વિત્તેશ્વરં સાઙ્ગિરા વસ્ત્રાણાં સ સિતઃ ક્રિયાદિ કુશલં સાર્કિઃ પુનર્ભૂ સુતમ્ ॥ ૨॥

મૂલાદિ સ્નેહ કૂટૈર્વ્યવહરતિ વણિગ્ બાહુ યોદ્ધા સ સૌમ્યે પુર્યધ્યક્ષઃ સ જીવે ભવતિ નર પતિઃ પ્રાપ્ત વિત્તો દ્વિજો વા ।
ગોપો મલ્લોઽથદક્ષઃ પરયુવતિ રતો દ્યૂત કૃત્ સાસુરેજ્યે દુઃખાર્તોઽસત્ય સંધઃ સ સવિતૃ તનયે ભૂમિજે નિન્દિતશ્ચ ॥ ૩॥

સૌમ્યે રઙ્ગ ચરો બૃહસ્પતિ યુતે ગીત પ્રિયો નૃત્યવિદ્ વાગ્મી ભૂ ગણપઃ સિતેન મૃદુના માયા પટુર્લઙ્ઘકઃ ।
સદ્ વિદ્યો ધનદારવાન્ બહુ ગુણઃ શુક્રેણયુક્તે ગુરૌ જ્ઞેયઃ શ્મશ્રુ કરોઽસિતેન ઘટકૃજ્ જાતોઽન્નકારોઽપિ વા ॥ ૪॥

અસિત સિત સમાગમે અલ્પ ચક્ષુર્યુવતિ સમાશ્રય સમ્પ્રવૃદ્ધ વિત્તઃ ।
ભવતિ ચ લિપિ પુસ્તક ચિત્ર વેત્તા કથિત ફલૈઃ પરતો વિકલ્પનીયાઃ ॥ ૫॥

---

પઞ્ચદશોઽધ્યાયઃ

પ્રવ્રજ્યાયોગ

એકસ્થૈશ્ચતુરાદિભિર્બલયુતૈર્જાતાઃ પૃથગ્ વીર્યગૈઃ શાક્યા જીવિક ભિક્ષુ વૃદ્ધ ચરકા નિર્ગ્રન્થ વન્યાશનાઃ ।
માહેય જ્ઞ ગુરુ ક્ષપા કર સિત પ્રાભાકરીનૈઃ ક્રમાત્ પ્રવ્રજ્યા બલિભિઃ સમા પરજિતૈસ્તત્ સ્વામિભિઃ પ્રચ્યુતિઃ ॥ ૧॥

રવિ કુપ્ત કરૈરદીક્ષિતા બલિભિસ્તદ્ગત ભક્તયો નરાઃ ।

અભિયાચિત માત્રદીક્ષિતા નિહતૈરન્ય નિરીક્ષિતૈરપિ ॥ ૨॥

જન્મેશોઽન્યૈર્યદ્યદૃષ્ટોઽર્કં પુત્રં પશ્યત્યાર્કિર્જન્મપં વા બલોનમ્ ।
દીક્ષાં પ્રાપ્નોત્યાર્કિ દૃક્ કાણ સંસ્થે ભૌમાર્ક્યંશે સૌરદૃષ્ટે ચ ચન્દ્રે ॥ ૩॥

સુર ગુરુ શશિ હોરા સ્વાર્કે દૃષ્ટાસુ ધર્મે ગુરુરથ નૃપતીનાં યોગજસ્તીર્થ કૃત્ સ્યાત્ ।
નવમ ભવન સંસ્થે મન્દગે અન્યૈર્દૃષ્ટે ભવતિ નરપયોગે દીક્ષિતઃ પાર્થિવેન્દ્રઃ ॥ ૪॥

---

ષોડશોઽધ્યાયઃ

નક્ષત્રફલ

પ્રિય ભૂષણઃ સુરૂપઃ સુભગો દક્ષોઽશ્વિનીષુ મતિમાંશ્ચ ।
કૃત નિશ્ચય સત્યારુગ્ દક્ષઃ સુખિતશ્ચ ભરણીષુ ॥ ૧॥

બહુ ભુક્ પરદારરતસ્તેજસ્વી કૃત્તિકાસુ વિખ્યાતઃ ।
રોહિણ્યાં સત્ય શુચિઃ પ્રિયંવદઃ સ્થિર મતિઃ સુરૂપશ્ચ ॥ ૨॥

ચપલશ્ચતુરો ભીરુઃ પટુરુત્સાહી ધની મૃગે ભોગી ।
શઠ ગર્વિતઃ કૃતઘ્નો હિંસ્રઃ પાપશ્ચરૌદ્રઋક્ષે ॥ ૩॥

દાન્તઃ સુખી સુશીલો દુર્મેધારોગ ભાક્ પિપાસુશ્ચ ।
અલ્પેન ચ સંતુષ્ટઃ પુનર્વસૌ જાયતે મનુજઃ ॥ ૪॥

શાન્તાત્મા સુભગઃ પણ્ડિતો ધની ધર્મ સંસૃતઃ પુષ્યે ।
શઠઃ સર્વ ભક્ષ પાપઃ કૃતઘ્નધૂર્તશ્ચ ભૌજઙ્ગે ॥ ૫॥

બહુ ભૃત્યધનો ભોગી સુર પિતૃ ભક્તો મહોદ્યમઃ પિત્ર્યે ।
પ્રિય વાગ્ દાતાદ્યુતિમાન્ અટનો નૃપ સેવકો ભાગ્યે ॥ ૬॥

સુભગો વિદ્યાપ્તધનો ભોગી સુખભાક્ દ્વિતીય ફાલ્ગુન્યામ્ ।
ઉત્સાહી ધૃષ્ટઃ પાનપો ઘૃણી તસ્કરો હસ્તે ॥ ૭॥

ચિત્રામ્બર માલ્યધરઃ સુલોચનાઙ્ગશ્ચ ભવતિ ચિત્રાયામ્ ।
દાન્તો વણિક્ કૃપાલુઃ પ્રિય વાગ્ ધર્માશ્રિતઃ સ્વાતૌ ॥ ૮॥

ઈર્ષ્યુર્લુબ્ધો દ્યુતિમાન્ વચન પટુઃ કલહ કૃદ્ વિશાખાસુ ।
આઢ્યો વિદેશ વાસી ક્ષુધાલુરટનોઽનુરાધાસુ ॥ ૯॥

જ્યેષ્ઠાસુ ન બહુ મિત્રઃ સંતુષ્ટો ધર્મ કૃત્ પ્રચુર કોપઃ ।
મૂલે માની ધનવાન્ સુખી ન હિંસ્રઃ સ્થિરો ભોગી ॥ ૧૦॥

ઇષ્ટાનન્દ કલત્રો માની દૃઢ સૌહ્ર્દશ્ચ જલદૈવે ।
વૈશ્વે વિનીતધાર્મિક બહુ મિત્ર કૃતજ્ઞ સુભગશ્ચ ॥ ૧૧॥

શ્રીમાગ્ છ્રવણે શ્રુતવાન્ ઉદારદારો ધનાન્વિતઃ ખ્યાતઃ ।
દાતાઢ્યઃ શૂરો ગીત પ્રિયો ધનિષ્ઠાસુ ધન લુબ્ધઃ ॥ ૧૨॥

સ્ફુટ વાગ્ વ્યસની રિપુહા સાહસિકઃ શતભિષજિ દુર્ગ્રાહ્યઃ ।
ભાદ્રપદાસુ દ્વિ ગનઃ સ્ત્રી જિતધની પટુરદાતા ચ ॥ ૧૩॥

વક્તા સુખી પ્રજાવાન્ જિત શત્રુર્ધાર્મિકો દ્વિતીયાસુ ।
સમ્પૂર્ણાઙ્ગઃ સુભગઃ શૂરઃ શુચિરર્થવાન્ પૌષ્ણે ॥ ૧૪॥

---

સપ્તદશોઽધ્યાયઃ

ચન્દ્રરાશિશીલ

વૃત્તાતામ્રદૃગ્ ઉષ્ણ શાક લઘુ ભુક્ ક્ષિપ્ર પ્રસાદોઽટનઃ કામી દુર્બલ જાનુરસ્થિરધનઃ શૂરોઽઙ્ગના વલ્લભઃ ।
સેવાજ્ઞઃ કનખી વ્રણાઙ્કિત શિરા માની સહોત્થાગ્રજઃ શક્ત્યા પાણિ તલે અઙ્કિતોઽતિચપલસ્તોયે અતિભીરુઃ ક્રિયે ॥ ૧॥

કાન્તઃ ખેલ ગતિઃ પૃથુ ઊરુ વદનઃ પૃષ્ઠાસ્ય પાર્શ્વાઙ્કિતસ્ત્યાગી ક્લેશ સહઃ પ્રભુઃ કકુદવાન્ કન્યા પ્રજઃ શ્લેષ્મલઃ
પૂર્વૈર્બન્ધુ ધનાત્મજૈર્વિરહિતઃ સૌભાગ્યયુક્તઃ ક્ષમી દીપ્તાગ્નિઃ પ્રમદા પ્રિયઃ સ્થિર સુહૃન્ મધ્યાન્ત્ય સૌખ્યો ગવિ ॥ ૨॥

સ્ત્રી લોલઃ સુરતોપચાર કુશલસ્તામ્રેક્ષણઃ શાસ્ત્રવિદ્ દૂતઃ કુઞ્ચિત મૂર્ધજઃ પટુ મતિર્હાસ્યેઙ્ગિતદ્યૂતવિત્ ।
ચાર્વઙ્ગઃ પ્રિય વાક્ પ્રભ ક્ષણરુચિર્ગીત પ્રિયો નૃત્યવિત્ ક્લીબૈર્યાતિ રતિં સમુન્નત નસશ્ચન્દ્રે તૃતીયર્ક્ષગે ॥ ૩॥

આવક્રદ્રુતગઃ સમુન્નત કટિઃ સ્ત્રી નિર્જિતઃ સત્ સુહૃદ્ દૈવજ્ઞઃ પ્રચુરાલય ક્ષયધનૈઃ સંયુજ્યતે ચન્દ્રવત્ ।
હ્રસ્વઃ પીન ગલઃ સમેતિ ચ વંશ સામ્ના સુહૃદ્ વત્સલસ્તોયોદ્યાનરતઃ સ્વ વેશ્મ સહિતે જાતઃ શશાઙ્કે નરઃ ॥ ૪॥

તીક્ષ્ણઃ સ્થૂલ હનુર્વિશાલ વદનઃ પિઙ્ગેક્ષણોઽલ્પાત્મજઃ સ્ત્રી દ્વેષી પ્રિય માંસ કાનન નગઃ કુપ્યત્યકાર્યે ચિરમ્ ।
ક્ષુત્ તૃણોદરદન્ત માનસરુજા સમ્પીડિતસ્ત્યાગવાન્ વિક્રાન્તઃ સ્થિરધીઃ સુગર્વિત મના માતુર્વિધેયોઽર્ક ભે ॥ ૫॥

વ્રીડા મન્થર ચારુ વીક્ષણ ગતિઃ સ્રસ્તાંસ બાહુઃ સુખી શ્લક્ષ્ણઃ સત્યરતઃ કલાસુ નિપુણઃ શાસ્ત્રાર્થવિદ્ ધાર્મિકઃ ।
મેધાવી સુરત પ્રિયઃ પર ગૃહૈર્વિત્તૈશ્ચ સંયુજ્યતે કન્યાયાં પરદેશગઃ પ્રિય વચાઃ કન્યા પ્રજોઽલ્પાત્મજઃ ॥ ૬॥

દેવ બ્રાહ્મણ સાધુ પૂજનરતઃ પ્રાજ્ઞઃ શુચિઃ સ્ત્રી જિતઃ પ્રાંશુશ્ચ ઉન્નત નાસિકઃ કૃશ ચલદ્ ગાત્રોઽટનોઽર્થાન્વિતઃ
હીનાઙ્ગઃ ક્રય વિક્રયેષુ કુશલો દેવદ્વિ નામા સરુક્ બન્ધૂનામ્ ઉપકાર કૃદ્ વિરુષિતસ્ત્યક્તસ્તુ તૈઃ સપ્તમે ॥ ૭॥

પૃથુલ નયન વક્ષા વૃત્ત જઙ્ઘોરુ જાનુર્જનક ગુરુ વિયુક્તઃ શૈશવે વ્યાધિતશ્ચ ।
નર પતિ કુલ પૂજ્યઃ પિઙ્ગલઃ ક્રૂર ચેષ્ટો ઝષ કુલિશ ખગાઙ્કશ્છન્ન પાપોઽલિજાતઃ ॥ ૮॥

વ્યાદિર્ઘાસ્ય શિરો ધરઃ પિતૃ ધનસ્ત્યાગી કવિર્વીર્યવાન્ વક્તા સ્થૂલરદ શ્રવોઽધર નસઃ કર્મોદ્યતઃ શિલ્પવિત્ ।
કુબ્જાંશઃ કુનખી સમાંસલ ભુજઃ પ્રાગલ્ભવાન્ ધર્મવિદ્ બન્ધુ દ્વિટ્ ન બલાત્ સમૈતિ ચ વંશ સામ્નૈક સાધ્યોઽશ્વજઃ ॥ ૯॥

નિત્યં લાલયતિ સ્વદાર તનયાન્ ધર્મધ્વજોઽધઃ કૃશઃ સ્વક્ષઃ ક્ષામ કટિર્ગૃહીત વચનઃ સૌભાગ્યયુક્તોઽલસઃ ।
શીતાલુર્મનુજોઽટનશ્ચ મકરે સત્વાધિકઃ કાવ્ય કૃલ્ લુબ્ધોઽગમ્ય જરાઙ્ગનાસુ નિરતઃ સન્ત્યક્ત લજ્જોઽઘૃણઃ ॥ ૧૦॥

કરભ ગલઃ શિરાલુઃ ખર લોમશદીર્ઘ તનુઃ પૃથુ ચરણોરુ પૃષ્ઠ જઘનાસ્ય કટિર્જરઠઃ ।
પર વનિતાર્થ પાપ નિરતઃ ક્ષય વૃદ્ધિ યુતઃ પ્રિય કુસુમાનુલેપન સુહૃદ્ ઘટજોઽધ્વ સહઃ ॥ ૧૧॥

જલ પરધન ભોક્તાદાર વાસોઽનુરક્તઃ સમરુચિર શરીરસ્તુઙ્ગ નાસો બૃહત્કઃ ।
અભિભવતિ સ પત્નાન્ સ્ત્રી જિતશ્ચારુ દૃ઼ર્ષ્ટિર્દ્યુતિ નિધિ ધન ભોગી પણ્ડિતશ્ચાન્ત્યરાશૌ ॥ ૧૨॥

બલવતિ રાશૌ તદધિપતૌ ચ સ્વ બલયુતઃ સ્યાદ્ યદિ તુહિનાંશુઃ ।
કથિત કલાનામ્ અવિકલદાતા શશિવદ્ અતોઽન્યેત્યનુપરિચિન્ત્યાઃ ॥ ૧૩॥

---

અષ્ટાદશોઽધ્યાયઃ

રાશિશીલ

પ્રથિતશ્ચતુરોઽટનોઽલ્પ વિત્તઃ ક્રિયગે ત્વાયુધ ભૃદ્ વિતુઙ્ગ ભાગે ।
ગવિ વસ્ત્ર સુગન્ધ પણ્ય જીવી વનિતાદ્ વિટ્ કુશલશ્ચ ગો યવાદ્યે ॥ ૧॥

વિદ્યા જ્યોતિષ વિત્તવાન્ મિથુનગે ભાનૌ કુલીરે સ્થિતે તીક્ષ્ણોઽસ્વઃ પર કાર્ય કૃચ્છ્રમ પથ ક્લેશૈશ્ચ સંયુજ્યતે ।
સિંહસ્થે વન શૈલ ગો કુલરતિર્વીર્યાન્વિતોઽજ્ઞઃ પુમાન્ કન્યાસ્થે લિપિ લેખ્ય કાવ્ય ગણિત જ્ઞાનાન્વિતઃ સ્ત્રી વપુઃ ॥ ૨॥

જાતસ્તૌલિનિ સૌણ્ડિકોઽધ્વનિ રતો હૈરણ્યકો નીચ કૃત્ ક્રૂરઃ સાહસિકો વિશાર્જિતધનઃ શસ્ત્રાન્તગોઽલિ સ્થિતે ।
સત્ પૂજ્યો ધનવાન્ ધનુર્ધર ગતે તીક્ષ્ણો ભિષક્ કારુકો નીચોઽજ્ઞઃ કુવણિઙ્ મૃગે અલ્પધનવાંલ્ લબ્ધોઽન્ય ભાગ્યૈર્રતઃ ॥ ૩॥

નીચો ઘટે તનય ભાગ્ય પરિચ્યુતોઽસ્વ સ્તોયોત્થ પણ્ય વિભવો બનિતાદ્ ઋતોઽન્ત્યે ।
નક્ષત્ર માનવ તનુ પ્રતિમે વિભાગે લક્ષ્માદિશેત્ તુહિનરશ્મિ દિનેશયુક્તે ॥ ૪॥

નર પતિ સત્ કૃતોઽટનશ્ચમૂપ વણિક્ સધનઃ ક્ષત તનુશ્ચૌર ભૂરિ વિષયાંશ્ચ કુજઃ સ્વ ગૃહે ।
યુવતિ જિતાન્ સુહૃત્સુ વિષમાન્ પરદારરતાન્ કુહક સુવેષ ભીરુ પૌર્ષાન્ સિત ભે જનયેત્ ॥ ૫॥

બૌધે અસહસ્તનયવાન્ વિસુહૃત્ કૃતજ્ઞો ગાન્ધર્વયુદ્ધ કુશલઃ કૃપણોઽભયોઽર્થી ।
ચાન્દ્રે અર્થવાન્ સલિલયાન સમર્જિત સ્વઃ પ્રાજ્ઞાશ્ચ ભૂમિ તનયે વિકલઃ ખલશ્ચ ॥ ૬॥

નિઃસ્વઃ ક્લેશ સહો વનાન્તર ચરઃ સિંહે અલ્પદારાત્મજો જૈવે નૈકરિપુર્નરેન્દ્ર સચિવઃ ખ્યાતોઽભયાલ્પાત્મજઃ ।
દુઃખાર્તો વિધનોઽટનોઽનૃતરતસ્તીક્ષ્ણશ્ચ કુમ્ભ સ્થિતે ભૌમે ભૂરિ ધનાત્મજો મૃગ ગતે ભૂપોઽથ વા તત્ સમઃ ॥ ૭॥

ધૂતઋણ પાનરત નાસ્તિક ચૌર નિઃસ્વાઃ કુસ્ત્રીક કૂટકૃદ્ અસત્યરતાઃ કુજઋક્ષે ।
આચાર્ય ભૂરિ સુતદારધનાર્જનેષ્ટાઃ શૌક્રે વદાન્યગુરુ ભક્તિ રતાશ્ચ સૌમ્યે ॥ ૮॥

વિકત્થનઃ શાસ્ત્ર કલા વિદગ્ધઃ પ્રિયંવદઃ સૌખ્યરતસ્તૃતીયે ।
જલાર્જિત સ્વઃ સ્વ જનસ્ય શત્રુઃ શશાઙ્કજે શીત કરઋક્ષયુક્તે ॥ ૯॥

સ્ત્રી દ્વેષ્યો વિધન સુખાત્મજોઽટનોઽજ્ઞઃ સ્ત્રી લોલઃ સ્વ પરિભવોઽર્કરાશિગે જ્ઞે ।
ત્યાગી જ્ઞઃ પ્રચુર ગુણઃ સુખી ક્ષમાવાન્ યુક્તિ જ્ઞો વિગત ભયશ્ચ ષષ્ઠરાશૌ ॥ ૧૦॥

પર કર્મ કૃદ્ અસ્વ શિલ્પ બુદ્ધી ઋણવાન્ વિષ્ટિ કરો બુધે અર્કજઋક્ષે ।
નૃપ સત્કૃત પણ્ડિતાપ્ત વાક્યો નવમે અન્ત્યે જિત સેવકાન્ત્ય શિલ્પઃ ॥ ૧૧॥

સેના નિર્બહુ વિત્તદાર તનયો દાતા સુભૃત્યઃ ક્ષમી તેજો દાર ગુણાન્વિતઃ સુર ગુરૌ ખ્યાતઃ પુમાન્ કૌજ ભે ।
કલ્પાઙ્ગઃ સધનાર્થ મિત્ર તનયસ્ત્યાગી પ્રિયઃ શૌક્ર ભે બૌધે ભૂરિ પરિચ્છદાત્મજ સુહૃત્ સાચિવ્યયુક્તઃ સુખી ॥ ૧૨॥

ચાન્દ્રે રત્ન સુત સ્વદાર વિભવ પ્રજ્ઞા સુખૈરન્વિતઃ સિંહે સ્યાદ્ બલ નાયકઃ સુર ગુરૌ પ્રોક્તં ચ યચ્ચન્દ્ર ભે ।
સ્વઋક્ષે માણ્ડલિકો નરેન્દ્ર સચિવઃ સેનાપતિર્વાધની કુમ્ભે કર્કટવત્ ફલાનિ મકરે નીચોઽલ્પ વિત્તોઽસુખી ॥ ૧૩॥

પરયુવતિ રતસ્તદર્થ વાદૈર્હૃત વિભવઃ કુલ પાંસનઃ કુજઋક્ષે ।
સ્વ બલ મતિ ધનો નરેન્દ્ર પૂજ્યઃ સ્વ જન વિભુઃ પ્રથિતોઽભયઃ સિતે સ્વે ॥ ૧૪॥

નૃપ કૃત્ય કરોઽર્થવાન્ કલાવિન્ મિથુને ષષ્ઠ ગતે અતિનીચ કર્મા
રવિજઋક્ષ ગતે અમરારિ પૂજ્યે સુભગઃ સ્ત્રી વિજિતો રતઃ કુનાર્ય્યામ્ ॥ ૧૫॥

દ્વિ ભાર્યોઽર્થી ભીરુઃ પ્રબલ મદ શોકશ્ચ શશિ ભે હરૌ યોષાપ્તાર્થઃ પ્રવરયુવતિર્મન્દ તનયઃ ।
ગુણૈઃ પૂજ્યઃ સ સ્વસ્તુરગ સહિતે દાનવ ગુરૌ ઝષે વિદ્વાન્ આઢ્યો નૃપ જનિત પૂજોઽતિસુભગઃ ॥ ૧૬॥

મૂર્ખોઽટનઃ કપટવાન્ વિસુહૃદ્ યમે અજે કીટે તુ બન્ધ વધ ભાક્ ચપલોઽઘૃણશ્ચ ।
નિહ્રીર્સુખાર્થ તનયઃ સ્ખલિતશ્ચ લેખ્યે રક્ષા પતિર્ભવતિ મુખ્ય પતિશ્ચ બૌધે ॥ ૧૭॥

વર્જ્ય સ્ત્રીષ્ટો ન બહુ વિભવો ભૂરિ ભાર્યો વૃષસ્થે ખ્યાતઃ સ્વોચ્ચે ગણ પુર બલ ગ્રામ પૂજ્યોઽર્થવાંશ્ચ ।
કર્કિણ્યસ્વો વિકલદશનો માતૃ હીનોઽસુતોઽજ્ઞઃ સિંહે અનાર્યો બિસુખ તનયો વિષ્ટિ કૃત્ સૂર્ય પુત્રે ॥ ૧૮॥

સ્વન્તઃ પ્રત્યયિતો નરેન્દ્ર ભવને સત્ પુત્ર જાયાધનો જીવ ક્ષેત્ર ગતે અર્કજે પુર બલ ગ્રામાગ્ર નેતાથ વા ।

અન્ય સ્ત્રી ધન સંવૃતઃ પુર બલ ગ્રામાગ્રણીર્મન્દદૃક્ સ્વ ક્ષેત્રે મલિનઃ સ્થિરાર્થ વિભવો ભોક્તા ચ જાતઃ પુમાન્ ॥ ૧૯॥

શિશિર કર સમાગમેક્ષણાનાં સદૃશ ફલં પ્રવદન્તિ લગ્ન જાતમ્ ।
ફલમ્ અધિકમ્ ઇદં યદ્ અત્ર ભાવાદ્ ભવન ભ નાથ ગુણૈર્વિચિન્તનીયમ્ ॥ ૨૦॥

---

એકોનવિંશોऽધ્યાયઃ

દૃષ્ટિફલ

ચન્દ્રે ભૂપ બુધૌ નૃપોપમ ગુણી સ્તેનોऽધનશ્ચાજગે નિઃસ્વઃ સ્તેન નૃ માન્ય ભૂપધનિનઃ પ્રેષ્યઃ કુજાદ્યૈર્ગવિ ।
નૃસ્થે અયો વ્યવહારિ પાર્થિવ બુધાભિસ્તન્તુ વાયોऽધનો સ્વઋક્ષે યોદ્ધૃ કવિ જ્ઞ ભૂમિ પતયોऽયો જીવિ દૃગ્ રોગિણૌ ॥ ૧॥

જ્યોતિર્જ્ઞાઢ્ય નરેન્દ્ર નાપિત નૃ પક્ષ્મેશા બુધાદ્યૈર્હરૌ તદ્વદ્ ભૂપ ચમૂપ નૈપુણયુતાઃ ષષ્ઠે અશુભૈઃ સ્ત્ર્યાશ્રયઃ ।
જૂકે ભૂપ સુવર્ણ કાર વણિજઃ શેષેક્ષિતે નૈકૃતી કીટે યુગ્મ પિતા નતશ્ચરજકો વ્યઙ્ગોऽધનો ભૂપતિઃ ॥ ૨॥

જ્ઞાત્યુર્વીશ જનાશ્રયશ્ચ તુરગે પાપૈઃ સદ્ અમ્ભઃ શઠશ્ચાત્યુર્વીશ નરેન્દ્ર પણ્ડિતધની દ્રવ્યોન ભૂપો મૃગે ।
ભૂપો ભૂપ સમોऽન્યદાર નિરતઃ શેષૈશ્ચ કુમ્ભ સ્થિતે હાસ્યજ્ઞો નૃપતિર્બુધશ્ચ ઝષગે પાપશ્ચ પાપેક્ષિતે ॥ ૩॥

હોરેશઋક્ષદલાશ્રિતૈઃ શુભ કરો દૃષ્ટઃ શશી તદ્ગતસ્ત્ર્યંશે તત્ પતિભિઃ સુહૃદ્ ભવનગૈર્વા વીક્ષિતઃ શસ્યતે ।
યત્ પ્રોક્તં પ્રતિ રાશિ વીક્ષણ ફલં તદ્દ્વાદશાંશે સ્મૃતં સૂર્યાદ્યૈરવલોકિતે અપિ શશિનિ જ્ઞેયં નવાંશેષ્વતઃ ॥ ૪॥

આરક્ષિકો વધરુચિઃ કુશલો નિયુદ્ધે ભૂપોऽર્થવાન્ કલહ કૃત્ ક્ષિતિજાંશ સંસ્થે ।
મૂર્ખોऽન્યદાર નિરતઃ સુકવિઃ સિતાંશે સત્ કાવ્ય કૃત્ સુખ પરોऽન્ય કલત્રગશ્ચ ॥ ૫॥

બૌધે હિ રઙ્ગ ચર ચૌર કવીન્દ્ર મન્ત્રી ગેય જ્ઞ શિલ્પ નિપુણઃ શશિનિ સ્થિતે અંશે ।
સ્વાંશે અલ્પ ગાત્રધન લુબ્ધ તપસ્વિ મુખ્યઃ સ્ત્રીપોऽપ્યકૃત્ય નિરતશ્ચ નિરીક્ષ્યમાણમ્ ॥ ૬॥

સ ક્રોધો નર પતિ સંમતો નિધીશઃ સિંહાંશે પ્રભુર સુતોऽતિહિંસ્ર કર્મા ।
જીવાંશે પ્રથિત બલો રણોપદેષ્ટા હાસ્ય જ્ઞઃ સચિવ વિકામ વૃદ્ધ શીલઃ ॥ ૭॥

અલ્પાપત્યો દુઃખિતઃ સત્યપિ સ્વે માનાસક્તઃ કર્મણિ સ્વે અનુરક્તઃ ।
દુષ્ટ સ્ત્રીષ્ટઃ કૃપણશ્ચાર્કિ ભાગે ચન્દ્રે ભાનૌ તદ્વદ્ ઇન્દ્વાદિ દૃષ્ટે ॥ ૮॥

વર્ગોત્તમ સ્વ પરગેષુ શુભં યદ્ ઉક્તં તત્ પુષ્ટ મધ્ય લઘુતા શુભમ્ ઉત્ક્રમેણ ।
વીર્યાન્વિતોऽંશક પતિર્નિરુણદ્ધિ પૂર્વં રાશી ક્ષણસ્ય ફલમ્ અંશ ફલં દદાતિ ॥ ૯॥

---

વિંશોऽધ્યાયઃ

ભાવ

શૂરઃ સ્તબ્ધો વિકલ નયનો નિર્ઘૃણોઽર્કે તનુસ્થે મેષે સ સ્વસ્તિમિર નયનઃ સિંહ સંસ્થે નિશાધઃ ।
નીચે અન્ધોઽસ્વઃ શશિ ગૃહ ગતે બુદ્બુદાક્ષઃ પતઙ્ગે ભૂરિ દ્રવ્યો નૃપ હૃતધનો વક્રરોગી દ્વિતીયે ॥ ૧॥

મતિ વિક્રમાંસ્તૃતીયગે અર્કે વિસુખઃ પીડિત માનશશ્ચતુર્થે ।
અસુતો ધન વર્જિતસ્ત્રિકોણે બલવાગ્ છત્રુ જિતશ્ચ શત્રુ યાતે ॥ ૨॥

સ્ત્રીભિર્ગતઃ પરિભવં મદગે પતઙ્ગે સ્વલ્પાત્મજો નિધનગે વિકલેક્ષણશ્ચ ।
ધર્મે સુતાર્થ સુખ ભાક્ સુખ શૌર્ય ભાક્ ખે લાભે પ્રભૂતધનવાન્ પતિતસ્તુ રિઃફે ॥ ૩॥

મૂકોન્મત્ત જડાન્ધ હીન બધિર પ્રેષ્યાઃ શશાઙ્કોદયે સ્વર્ક્ષજોચ્ચ ગતે ધની બહુ સુતઃ સ સ્વઃ કુટુમ્બી ધને ।
હિંસ્રો ભ્રાતૃ ગતે સુખે સ તનયે તત્ પ્રોક્ત ભાવાન્વિતો નૈકારિર્મૃદુ કાય વહ્નિ મદનસ્તીક્ષ્ણોઽલસશ્ચારિગે ॥ ૪॥

ઈર્ષુસ્તીવ્ર મદો મદે બહુ મતિર્વ્યાધ્યર્દિતશ્ચાષ્ટમે સૌભાગ્યાત્મજ મિત્ર બન્ધુ ધન ભાગ્ ધર્મ સ્થિતે શીતગૌ ।
નિષ્પત્તિં સમુપૈતિ ધર્મધનધી શૌર્યૈર્યુતઃ કર્મગે ક્યાતો ભાવ ગુણાન્વિતો ભવ ગતે ક્ષુદ્રોઽઙ્ગ હીનો વ્યયે ॥ ૫॥

લગ્ને કુજે ક્ષત તનુર્ધનગે કદ્ અન્નો ધર્મે અઘવાન્ દિન કર પ્રતિમોઽન્ય સંસ્થઃ ।
વિદ્વાન્ ધની પ્રખલ પણ્ડિત મન્ત્ર્યશત્રુર્ધર્મજ્ઞ વિશ્રુત ગુણઃ પરતોઽર્કવજ્ જ્ઞે ॥ ૬॥

વિદ્વાન્ સુવાક્યઃ કૃપણઃ સુખી ચ ધી માન શત્રુઃ પિતૃતોઽધિકશ્ચ ।
નીચસ્તપસ્વી સધનઃ સ લાભઃ ખલશ્ચ જીવે ક્રમશો વિલગ્નાત્ ॥ ૭॥

સ્મર નિપુણઃ સુખિતશ્ચ વિલગ્ને પ્રિય કલહોઽસ્ત ગતે સુરતેપ્સુઃ ।
તનય ગતે સુખિતો ભૃગુ પુત્રે ગુરુ વદતોઽન્ય ગૃહે સધનોઽન્ત્યે ॥ ૮॥

અદૃષ્ટાર્થો રોગી મદન વશગોઽત્યન્ત મલિનઃ શિશુત્વે પીડાર્તઃ સવિતૃ સુત લગ્નેત્યલસ વાક્ ।
ગુરુ સ્વર્ક્ષોચ્ચસ્થે નૃ પતિ સદૃશો ગ્રામ પુરપઃ
સુવિદ્વાંશ્ચાર્વઙ્ગો દિન કર સમોઽન્યત્ર કથિતઃ ॥ ૯॥

સુહૃદ્ અરિ પરકીય સ્વર્ક્ષ તુઙ્ગ સ્થિતાનાં ફલમ્ અનુપરિચિન્ત્યં લગ્નદેહાદિ ભાવૈઃ ।
સમુપચય વિપત્તી સૌમ્ય પાપેષુ સત્યઃ કથયતિ વિપરીતં રિઃફ ષષ્ઠાષ્ટ ભેષુ ॥ ૧૦॥

ઉચ્ચ ત્રિકોણ સ્વ સુહૃર્ચ્છત્રુ નીચ ગૃહાર્કગૈઃ ।
શુભં સમ્પૂર્ણ પાદોનદલ પાદાલ્પ નિષ્ફલમ્ ॥ ૧૧॥

---

એકવિંશોઽધ્યાયઃ

આશ્રયયોગ

કુલ સમ કુલ મુખ્ય બન્ધુ પૂજ્યાધનિ સુખિ ભોગિ નૃપાઃ સ્વ ભૈક વૃદ્ધ્યા ।

પર વિભવ સુહૃત્ સ્વ બન્ધુ પોષ્યા ગણપ બલેશ નૃપાશ્ચ મિત્ર ભેષુ ॥ ૧॥

જનયતિ નૃપમ્ એકોઽપ્યુચ્ચગો નિત્રદૃષ્ટઃ પ્રચુરધન સમેતં મિત્રયોગાચ્ચ સિદ્ધમ્ ।
વિધન વિસુખ મૂઢ વ્યાધિતો બન્ધ તપ્તો વધદુરિત સમેતઃ શત્રુ નીચઋક્ષગેષુ ॥ ૨॥

ન કુમ્ભ લગ્નં શુભમ્ આહ સત્યો ન ભાગ ભેદાદ્ યવના વદન્તિ ।
કસ્યાંશ ભેદો ન તથાસ્તિ રાશેરતિપ્રસઙ્ગસ્ત્વિતિ વિષ્ણુ ગુપ્તઃ ॥ ૩॥

યાતેષ્વસત્ સ્વ સમ ભેષુ દિનેશ હોરાં ખ્યાતો મહોદ્યમ બલાર્થયુતોઽતિતેજાઃ ।
ચાન્દ્રીં શુભેષુ યુજિ માર્દવ કાન્તિ સૌખ્ય સૌભાગ્યધી મધુર વાક્યયુતઃ પ્રજાતઃ ॥ ૪॥

તાસ્વેવ હોરા સ્વ પરઋક્ષગેષુ જ્ઞેયા નરાઃ પૂર્વ ગણેષુ મધ્યાઃ ।
વ્યત્યસ્ત હોરા ભવન સ્થિતેષુ મર્ત્યા ભવન્ત્યુક્ત ગુણૈર્વિહીનાઃ ॥ ૫॥

કલ્યાણરૂપ ગુણમ્ આત્મ સુહૃર્‍દ્ દૃકોણે ચન્દ્રોઽન્યગસ્તદધિનાથ ગુણં કરોતિ ।
વ્યાલોદ્યયાયુધ ચતુશ્ચરણાણ્ડજેષુ તીક્ષ્ણોઽતિહિંસ્ર ગુરુ તલ્પરતોઽટનશ્ચ ॥ ૬॥

સ્તેનો ભોક્તા પણ્ડિતાઢ્યો નરેન્દ્રઃ ક્લીબઃ શૂરો વિષ્ટિકૃદ્ દાસ વૃત્તિઃ ।
પાપો હિંસ્રોઽભીશ્ચ વર્ગોત્તમાંશેષ્વેષામ્ ઈષારાશિવદ્ દ્વાદશાંશૈઃ ॥ ૭॥

જાયાન્વિતો બલ વિભૂષણ સત્વયુક્તોસ્તેજોઽતિસાહસયુતશ્ચ કુજે સ્વ ભાગે ।
રોગી મૃત સ્વયુવતિર્વિષમોઽન્યદારો દુઃખી પરિચ્છદયુતો મલિનોઽર્ક પુત્રે ॥ ૮॥

સ્વાંશે ગુરૌ ધનયશઃ સુખ બુદ્ધિ યુક્તાસ્તેજસ્વિ પૂજ્ય નિરુગ્ ઉદ્યમ ભોગવન્તઃ ।
મેધા કલાક પટ કાવ્ય વિવાદ શિલ્પ શાસ્ત્રાર્થ સાહસયુતાઃ શશિજે અતિમાન્યાઃ ॥ ૯॥

સ્વે ત્રિંશાંશે બહુ સુત સુખારોગ્ય ભાગ્યાર્થરૂપઃ શુક્રે તીક્ષ્ણઃ સુલલિત વપુઃ સુપ્રકીર્ણેન્દ્રિયશ્ચ ।
શૂર સ્તબ્ધૌ વિષમ વધકૌ સદ્ ગુણાઢ્યૌ સુખિજ્ઞૌ ચાર્વઙ્ગે
અષ્ટૌ રવિ શશિ યુતેષ્વાર પૂર્વાંશકેષુ ॥ ૧૦॥

---

દ્વાવિંશોઽધ્યાયઃ

પ્રકીર્ણક

સ્વઋક્ષ તુઙ્ગ મૂલ ત્રિકોણગાઃ કણ્ટકેષુ યાવન્તાશ્રિતાઃ ।
સર્વૈવ તે અન્યોન્ય કારકાઃ કર્મગસ્તુ તેષાં વિશેષતઃ ॥ ૧॥

કર્કટોદય ગતે યથોડુપે સ્વોચ્ચગાઃ કુજયમાર્ક સૂરયઃ ।
કારકા નિગદિતાઃ પરસ્પરં લગ્નગસ્ય સકલોઽમ્બરામ્બુગઃ ॥ ૨॥

સ્વ ત્રિકોણોચ્ચગો હેતુરન્યોન્યં યદિ ચર્મગઃ ।

સુહૃત્ તદ્ગુણ સમ્પન્નઃ કારકશ્ચાપિ સ સ્મૃતઃ ॥ ૩॥

શુભં વર્ગોત્તમે જન્મ વેશિ સ્થાને ચ સદ્ ગૃહે ।
અશૂન્યેષુ ચ કેન્દ્રેષુ કારકાખ્ય ગ્રહેષુ ચ ॥ ૪॥

મધ્યે વયસઃ સુખ પ્રદાઃ કેન્દ્રસ્થા ગુરુ જન્મ લગ્નપાઃ ।
પૃષ્ઠોભયકોદયઋક્ષગાસ્ત્વન્તે અન્તઃ પ્રથમેષુ પાકદાઃ ॥ ૫॥

દિન કરરુધિરૌ પ્રવેષ કાલે ગુરુ ભૃગુજૌ ભવનસ્ય મધ્યયાતૌ ।
રવિ સુત શશિનૌ વિનિર્ગમસ્થૌ શશિ તનયઃ ફલદસ્તુ સર્વ કાલમ્ ॥ ૬॥

---

ત્રયોવિંશોઽધ્યાયઃ

અનિષ્ટ

લગ્નાત્ પુત્ર કલત્ર ભે શુભ પતિ પ્રાપ્તે અથ વાલોકિતે ચન્દ્રાદ્ વા યદિ સમ્પદ્ અસ્તિ હિ તયોર્જ્ઞેયોઽન્યથા સંભવઃ ।
પાથોનોદયગે રવૌ રવિ સુતો મીન સ્થિતો દારહા પુત્ર સ્થાન ગતશ્ચ પુત્ર મરણં પુત્રોઽવનેર્યચ્છતિ ॥ ૧॥

ઉગ્ર ગ્રહૈઃ સિત ચતુરસ્ર સંસ્થિતૈર્મધ્ય સ્થિતે ભૃગુ તનયે અથ વા ઉગ્રયોઃ ।
સૌમ્ય ગ્રહૈરસહિત સંનિરીક્ષિતે જાયા વધો દહન નિપાત પાશજઃ ॥ ૨॥

લગ્નાદ્ વ્યયારિ ગતયોઃ શશિ તિગ્મરશ્મ્યોઃ પત્ન્યા સહૈક નયનસ્ય વદન્તિ જન્મ ।
દ્યૂનસ્થયોર્નવમ પઞ્ચમ સંસ્થયોર્વા શુક્રાર્કયોર્વિકલદારમ્ ઉશન્તિ જાતમ્ ॥ ૩॥

કોણોદયે ભૃગુ તનયે અસ્ત ચક્ર સંધૌ વન્ધ્યા પતિર્યદિ ન સુતઋક્ષમ્ ઇષ્ટયુક્તમ્ ।
પાપ ગ્રહૈર્વ્યય મદ લગ્નરાશિ સંસ્થૈઃ ક્ષીણે શશિન્યસુત કલત્ર જન્મધીસ્થે ॥ ૪॥

અસિત કુજયોર્વર્ગે અસ્તસ્થે સિતે તદવેક્ષિતે પરયુવતિગસ્તૌ ચેત્ સેન્દુ સ્ત્રિયા સહ પુંશ્ચલઃ ।
ભૃગુજ શશિનોરસ્તે અભાર્યો નરો વિસુતોઽપિ વા પરિણત તનૂ નૃ સ્ત્ર્યોર્દૃષ્ટૌ શુભૈઃ પ્રમદા પતી ॥ ૫॥

વંશ ચ્છેત્તા ખ મદ સુખગૈશ્ચન્દ્રદૈત્યેજ્ય પાપૈઃ શિલ્પી ત્ર્યંશે શશિ સુતયુતે કેન્દ્ર સંસ્થાર્કિ દૃષ્ટે ।
દાસ્યાં જાતો દિતિ સુત ગુરૌ રિઃફગે સૌર ભાગે નીચોઽર્કેન્દ્વોર્મદન ગતયોર્દૃષ્ટયોઃ સૂર્યજેન ॥ ૬॥

પાપાલોકિતયોઃ સિતાવનિજયોરસ્તસ્થયોર્વાધ્યરુક્ ચન્દ્રે કર્કટ વૃશ્ચિકાંશક ગતે પાપૈર્યુતે ગુહ્યરુક્ ।
શ્વિ ત્રી રિઃફધનસ્થયોરશુભયોશ્ચન્દ્રોદયે અસ્તે રવૌ ચન્દ્રે ખે અવનિજે અસ્તગે ચ વિકલો યદ્યર્કજો વેશિગઃ ॥ ૭॥

અન્તઃ શશિન્યશુભયોર્મૃગગે પતઙ્ગે શ્વાસ ક્ષય પ્લિહક વિદ્રધિ ગુલ્મ ભાજઃ ।
શોષી પરસ્પર ગૃહાંશ ગયોર્રવીન્દ્વોઃ ક્ષેત્રે અથ વા યુગપદ્ એકગયોઃ કૃશો વા ॥ ૮॥

ચેન્દ્રે અશ્વિ મધ્ય ઝષ કર્કિ મૃગાજ ભાગે કુષ્ઠી સ મન્દરુધિરે તદવેક્ષિતે વા ।
યાતૈસ્ત્રિકોણમ્ અલિ કર્કિ વૃષૈર્મૃગે ચ કુષ્ઠી ચ પાપ સહિતૈરવલોકિતૈર્વા ॥ ૯॥

નિધનારિ ધન વ્યય સ્થિતારવિ ચન્દ્રારયમા યથા તથા ।
બલવદ્ ગ્રહદોષ કારણૈર્મનુજાનાં જનયન્ત્યનેત્રતામ્ ॥ ૧૦॥

નવમાય તૃતીયધી યુતા ન ચ સૌમ્યૈરશુભા નિરીક્ષિતાઃ ।
નિયમાચ્છ્રવણોપઘાતદારદ વૈકૃત્ય કરાશ્ચ સપ્તમે ॥ ૧૧॥

ઉદયત્યુડુપે સુરાસ્યગે સ પિશાચોઽશુભયોસ્ત્રિકોણયોઃ ।
સ ઉપપ્લવ મણ્ડલે રવાવુદયસ્થે નયનાપવર્જિતઃ ॥ ૧૨॥

સંસ્પૃષ્ટઃ પવનેન મન્દગયુતે દ્યૂને વિલગ્ને ગુરૌ સ ઉન્માદોઽવનિજે સ્થિતે અસ્ત ભવને જીવે વિલગ્નાશ્રિતે ।
તદ્વત્ સૂર્ય સુતોદયે અવનિ સુતે ધર્માત્મજદ્યૂનગે જાતો વાસ સહસ્રરશ્મિ તનયે ક્ષીણે વ્યયે શીતગૌ ॥ ૧૩॥

રાશ્યંશપોષ્ણ કર શીત કરામરેજ્યૈર્નીચાધિપાંશ ગતૈરરિ ભાગગૈર્વા ।
એભ્યોઽલ્પ મધ્ય બહુભિઃ ક્રમશઃ પ્રસૂતા જ્ઞેયાઃ સ્યુરભ્યુપગમ ક્રય ગર્ભદાસાઃ ॥ ૧૪॥

વિકૃતદશનઃ પાપૈર્દૃષ્ટે વૃષાજ હયોદયે ખલતિરશુભ ક્ષેત્રે લગ્ને હયે વૃષ ભે અપિ વા ।
નવમ સુતગે પાપૈર્દૃષ્ટે રવાવદૃઢેક્ષણો દિન કર સુતે નૈક વ્યાધિઃ કુજે વિકલઃ પુમાન્ ॥ ૧૫॥

વ્યય સુતધનધર્મગૈરસૌમ્યૈર્ભવન સ માન નિબન્ધનં વિકલ્પ્યમ્ ।
ભુજ ગનિ ગડ પાશભૃદ્ દૃકાણૈર્બલવદ્ અસૌમ્ય નિરીક્ષિતૈશ્ચ તદ્વત્ ॥ ૧૬॥

પુરુષ વચનોઽપસ્મારાર્તઃ ક્ષયી ચ નિશા પતૌ સરવિ તનયે વક્રાલોકં ગતે પરિવેષગે ।
રવિ યમ કુજૈઃ સૌમ્યાદૃષ્ટૈર્નભઃ સ્થલમ્ આશ્રિતૈર્ભૃતક મનુજઃ પૂર્વોદ્દિષ્ટૈર્વરાધમ મધ્યમાઃ ॥ ૧૭॥

---

ચતુર્વિંશોઽધ્યાયઃ

સ્ત્રીજાતક

યદ્ યત્ ફલં નર ભવે ક્ષમમ્ અઙ્ગનાનાં તત્ તદ્વદેત્ પતિષુ વા સકલં વિધેયમ્ ।
તાસાં તુ ભર્તૃ મરણં નિધને વપુસ્તુ લગ્નેન્દુગં સુભગતાસ્તમયે પતિશ્ચ ॥ ૧॥

યુગ્મેષુ લગ્ન શશિનોઃ પ્રકૃતિ સ્થિતા સ્ત્રી સચ્છીલ ભૂષણયુતા શુભદૃષ્ટયોશ્ચ ।
ઓજસ્થયોશ્ચ મનુજાકૃ઼ર્ ્તિ શીલયુક્તા પાપા ચ પાપયુતેક્ષિતયોર્ગુણોના ॥ ૨॥

કન્યાઇવદુષ્ટા વ્રજતીહદાસ્યં સાધ્વી સ માયા કુચરિત્રયુક્તા ।
ભૂમ્યાત્મજઋક્ષે ક્રમશોઽંશકેષુ વક્રાર્કિ જીવેન્દુજ ભાર્ગવાનમ્ ॥ ૩॥

દુષ્ટા પુનર્ભૂઃ સ ગુણા કલાજ્ઞા ખ્યાતા ગુણૈશ્ચાસુર પૂજિતઋક્ષે ।
સ્યાત્ કાપટી ક્લીબ સમા સતી ચ બૌધે ગુણાઢ્યા પ્રવિકીર્ણકામા ॥ ૪॥

સ્વ ચ્છન્દા પતિ ઘાતિની બહુ ગુણા શિલ્પિન્યસાધ્વીન્દુ ભે ।

ન્રાચારા કુલટાર્ક ભે નૃપ વધૂઃ પુંશ્ચેષ્ટિતાગમ્યગા ।
જૈવેનૈકગુણાલ્પરત્યતિગુણા વિજ્ઞાનયુક્તા સતી ।
દાસી નીચરતાર્કિ ભે પતિ રતાદુષ્ટા પ્રજા સ્વાંશકૈઃ ॥ ૫॥

શશિ લગ્ન સમાયુક્તૈઃ ફલં ત્રિંશાંશકૈરિદમ્ ।
બલાબલ વિકલ્પેન તયોરુક્તં વિચિન્તયેત્ ॥ ૬॥

દૃક્ સંસ્થાવસિત સિતૌ પરસ્પરાંશે શૌક્રે વા યદિ ઘટરાશિ સંભવોઽંશઃ ।
સ્ત્રીભિઃ સ્ત્રી મદન વિષાનલ પ્રદીપ્તં સંશાન્તિં નયતિ નરાકૃતિ સ્થિતાભિઃ ॥ ૭॥

શૂન્યે કાપુરુષો બલે અસ્ત ભવને સૌમ્ય ગ્રહાવીક્ષિતે ક્લીવોઽસ્તે બુધ મન્દયોશ્ચર ગૃહે નિત્યં પ્રવાસાન્વિતઃ ।
ઉત્સૃષ્ટારવિણા કુજેન વિધવા વાલ્યે અસ્તરાશિ સ્થિતે કન્યાઇવાશુભ વીક્ષિતે અર્ક તનયે દ્યૂને જરાં ગચ્છતિ ॥ ૮॥

આગ્નેયૈર્વિધવાસ્તરાશિ સહિતૈર્મિશ્રૈઃ પુનર્ભૂર્ભવેત્ ક્રૂરે હીન બલે અસ્તગે સ્વ પતિના સૌમ્યેક્ષિતે પ્રોજ્ઝિતા ।
અન્યોન્યાંશગયોઃ સિતાવનિજયોરન્ય પ્રસક્તાઙ્ગના દ્યૂને વા યદિ શીતરશ્મિ સહિતૌ ભર્તુસ્તદાનુજ્ઞયા ॥ ૯॥

સૌરારઋક્ષે લગ્નગે સેન્દુ શુક્રે મત્રા સાર્દ્ધં બન્ધકી પાપદૃષ્ટે ।
કૌજે અસ્તાંશે સૌરિણા વ્યાધિ યોનિશ્ચારુ શ્રોણી વલ્લભા સદ્ ગ્રહાંશે ॥ ૧૦॥

વૃદ્ધો મૂર્ખઃ સૂર્યજઋક્ષે અંશકે વા સ્ત્રી લોલઃ સ્યાત્ ક્રોધનશ્ચાવનેયે ।
શૌક્રે કાન્તોઽતીવ સૌભાગ્યયુક્તો વિદ્વાન્ ભર્તા નૈપુણ જ્ઞશ્ચ બૌધે ॥ ૧૧॥

મદન વશ ગતો મૃદુશ્ચ ચાન્દ્રે ત્રિ દશ ગુરૌ ગુણવાન્ જિતેન્દ્રિયશ્ચ ।
અતિમૃદુ રતિ કર્મ કૃચ્ચ સૌર્યે ભવતિ ગૃહે અસ્તમય સ્થિતે અંશકે વા ॥ ૧૨॥

ઈર્ષ્યાન્વિતા સુખ પરા શશિ શુક્ર લગ્ને જ્ઞેન્દ્વોઃ કલાસુ નિપુણા સુખિતા ગુણાઢ્યા ।
શુક્ર જ્ઞયોસ્તુ રુચિરા સુભગા કલાજ્ઞા ત્રિષ્વપ્યનેક વસુ સૌખ્ય ગુણા શુભેષુ ॥ ૧૩॥

ક્રૂરે અષ્ટમે વિધવતા નિધનેશ્વરોઽંશે યસ્ય સ્થિતો વયસિ તસ્ય સમે પ્રદિષ્ટા ।
સત્ સ્વર્થગેષુ મરણં સ્વયમ્ એવ તસ્યાઃ કન્યાલિગો હરિષુ ચાલ્પ સુતત્વમ્ ઇન્દૌ ॥ ૧૪॥

સૌરે મધ્ય બલે બલેનરહિતૈઃ શીતાંશુ શુક્રેન્દુજૈઃ શેષૈર્વીર્ય સમન્વિતૈઃ પરુષિણી યદ્યોજરાશ્યુદ્ગમઃ ।
જીવાર સ્ફુજિ દૈન્દવેષુ બલિષુ પ્રાગ્ લગ્નરાશૌ સમે વિખ્યાતા ભુવિ નૈક શાસ્ત્ર નિપુણા સ્ત્રી બ્રહ્મ વાદિન્યપિ ॥ ૧૫॥

પાપે અસ્તે નવમ ગત ગ્રહસ્ય તુલ્યાં પ્રવ્રજ્યાં યુવતિરુપૈત્યસંશયેન ।
ઉદ્વાહે વરણ વિધૌ પ્રદાન કાલે ચિન્તાયામ્ અપિ સકલં વિધેયમ્ એતત્ ॥ ૧૬॥

---

પંચવિંશોઽધ્યાયઃ

નૈર્યાણિક

મૃત્યુર્મૃત્યુ ગૃહેક્ષણેન બલિભિસ્તદ્ધાતુ કોપોદ્ભવસ્તત્ સંયુક્ત ભ ગાત્રજો બહુ ભવો વીર્યાન્વિતૈર્ભૂરિભિઃ ।
અગ્ન્યંબ્વાયુધજો જ્વરામય કૃતસ્તૃટ્ ક્ષુત્ કૃતશ્ચાષ્ટમે સૂર્યાદ્યૈર્નિધને ચરાદિષુ પર સ્વાધ્વ પ્રદેશેષ્વિતિ ॥ ૧॥

શૈલાગ્રાભિહતસ્ય સૂર્ય કુજયોર્મૃત્યુઃ ખ બન્ધુસ્થયોઃ કૂપે મન્દ શશાઙ્ક ભૂમિ તનયૈર્બન્ધ્વસ્ત કર્મ સ્થિતૈઃ ।
કન્યાયાં સ્વ જનાદ્ ધિમોષ્ણ કરયોઃ પાપ ગ્રહૈર્દૃષ્ટયોઃ સ્યાતાં યદ્યુભયોદયે અર્ક શશિનૌ તોયે તદા મજ્જિતઃ ॥ ૨॥

મન્દે કર્કટગે જલોદર કૃતો મૃત્યુર્મૃગાઙ્કે મૃગે શસ્ત્રાગ્નિ પ્રભવઃ શશિન્યશુભયોર્મધ્યે કુજ ઋક્ષે સ્થિતે ।
કન્યાયાં રુધિરોત્થ શોષ જનિતસ્તદ્વત્ સ્થિતે શીતગૌ સૌરઋક્ષે યદિ તદ્વદ્ એવ હિમગૌ રજ્જ્વગ્નિ પાતૈઃ કૃતઃ ॥ ૩॥

બન્ધાદ્ ધી નવમસ્તયોરશુભયોઃ સૌમ્ય ગ્રહાદ્ દૃષ્ટયોર્દ્રેષ્કાણૈશ્ચ સ પાશ સર્પ નિગડૈશ્છિદ્ર સ્થિતૈર્બન્ધતઃ ।
કન્યાયામ્ અશુભાન્વિતે અસ્તમયગે ચન્દ્રે સિતે મેષગે સૂર્યે લગ્ન ગતે ચ વિદ્ધિ મરણં સ્ત્રી હેતુકં મન્દિરે ॥ ૪॥

શૂલોદ્ભિન્ન તનુઃ સુખે અવનિ સુતે સૂર્યે અપિ વા ખે યમે સ પ્રક્ષીણ હિમાંશુભિશ્ચ યુગપત્ પાપૈસ્ત્રિકોણાદ્યગૈઃ ।
બન્ધુસ્થે ચરવૌ વિયત્યવનિજે ક્ષીણેન્દુ સંવીક્ષિતે કાષ્ઠેનાભિહતઃ પ્રયાતિ મરણં સૂર્યાત્મજેનેક્ષિતે ॥ ૫॥

રન્ધ્રાસ્પદાઙ્ગ હિબુકૈર્લગુડાહતાઙ્ગઃ પ્રક્ષીણ ચન્દ્રરુધિરાર્કિ દિનેશયુક્તૈઃ ।
તૈરેવ કર્મ નવમોદય પુત્ર સંસ્થૈર્ધૂમાગ્નિ બન્ધન શરીર નિકુટ્ટનાન્તઃ ॥ ૬॥

બન્ધ્વસ્ત કર્મ સહિતૈઃ કુજ સૂર્ય મન્દૈર્નિર્યાણમ્ આયુધ શિખિ ક્ષિતિ પાલ કોપાત્ ।
સૌરેન્દુ ભૂમિ તનયૈઃ સ્વ સુખાસ્પદસ્થૈર્જ્ઞેયઃ ક્ષત કૃમિ કૃતશ્ચ શરીર ઘાતઃ ॥ ૭॥

ખસ્થે અર્કે અવનિજે રસાતલ ગતે યાન પ્રપાતદ્ વધો યન્ત્રોત્પીડનજઃ કુજે અસ્તમયગે સૌરેન્દુનાભ્યુદ્ગમે ।
વિણ્ મધ્યે રુધિરાર્કિ શીત કિરણૈર્જૂકાજ સૌરઋક્ષગૈર્યાતે વા ગલિતેન્દુ સૂર્યરુધિરૈર્વ્યોમાસ્ત બન્ધ્વાહ્વયાન્ ॥ ૮॥

વીર્યાન્વિત વક્ર વીક્ષિતે ક્ષીણેન્દૌ નિધન સ્થિતે અર્કજે ।
ગુહ્યોદ્ભવરોગ પીડયા મૃત્યુઃ સ્યાત્ કૃમિ શસ્ત્રદાહજઃ ॥ ૯॥

અસ્તે રવૌ સરુધિરે નિધને અર્ક પુત્રે ક્ષીણે રસાતલ ગતે હિમગૌ ખગાન્તઃ ।
લગ્નાત્મજાષ્ટમ તપઃસ્વિન ભૌમ મન્દ ચન્દ્રૈસ્તુ શૈલ શિખરાશનિ કુડ્ય પાતૈઃ ॥ ૧૦॥

દ્વાવિંશઃ કથિતસ્તુ કારણં દ્રેષ્કાણો નિધનસ્ય સૂરિભિઃ ।
તસ્યાધિપતિર્ભવોઽપિ વા નિર્યાણં સ્વ ગુણૈઃ પ્રયચ્છતિ ॥ ૧૧॥

હોરા નવાંશકપયુક્ત સ માન ભૂમૌ યોગેક્ષણાદિભિરતઃ પરિકલ્પ્યમ્ એતત્ ।
મોહસ્તુ મૃત્યુ સમયે અનુદિતાંશ તુલ્યઃ સ્વેશેક્ષિતે દ્વિ ગુણિતસ્ત્રિગુણઃ શુભૈશ્ચ ॥ ૧૨॥

દહન જલ વિમિશ્રૈર્ભસ્મ સંક્લેદ શોષૈર્નિધન ભવન સંસ્થૈર્વ્યાલ વર્ગૈર્વિડન્તઃ ।
ઇતિ શવ પરિણામશ્ચિન્તનીયો યથોક્તઃ પૃથુવિ રચિત શાસ્ત્રાદ્ ગત્યનૂકાદિ ચિન્ત્યમ્ ॥ ૧૩॥

ગુરુરુડુ પતિ શુક્રૌ સૂર્ય ભૌમૌ યમ જ્ઞૌ વિબુધ પિતૃ તિરશ્ચો નારકીયાંશ્ચ કુર્યુઃ ।
દિન કર શશિ વીર્યાધિષ્ઠિતાત્ ત્ર્યંશ નાથાત્ પ્રવર સમ નિકૃષ્ટાસ્તુઙ્ગ હ્રસાદ્ અનૂકે ॥ ૧૪॥

ગતિરપિ રિપુ રન્ધ્ર ત્ર્યંશપોઽસ્તસ્થિતો વા ગુરુરથરિપુ કેન્દ્ર ચ્છિદ્રગઃ સ્વોચ્ચ સંસ્થઃ ।
ઉદયતિ ભવને અન્ત્યે સૌમ્ય ભાગે ચ મોક્ષો ભવતિ યદિ બલેન પ્રોજ્ઝિતાસ્તત્ર શેષાઃ ॥ ૧૫॥

---

ષડ્વિંશોઽધ્યાયઃ

નષ્ટજાતક

આધાન જન્માપરિબોધ કાલે સમ્પૃચ્છતો જન્મ વદેદ્ વિલગ્નાત્ ।
પૂર્વાપરાર્ધે ભવનસ્ય વિન્દ્યાદ્ ભાનાવુદગ્ દક્ષિણગે પ્રસૂતિમ્ ॥ ૧॥

લગ્ન ત્રિકોણેષુ ગુરુસ્ત્રિ ભાગૈર્વિકલ્પ્ય વર્ષાણિ વયોઽનુમાનાત્ ।
ગ્રીષ્મોઽર્ક લગ્ને કથિતાસ્તુ શેષૈરન્યાયનર્તાવૃતુરર્ક ચારાત્ ॥ ૨॥

ચન્દ્ર જ્ઞ જીવાઃ પરિવર્તનીયાઃ શુક્રાર મન્દૈરયને વિલોમે ।
દ્રેષ્કાણ ભાગે પ્રથમે તુ પૂર્વો માસોઽનુપાતાચ્ચ તિથિર્વિકલ્પ્યઃ ॥ ૩॥

અત્રાપિ હોરા પટવો દ્વિજેન્દ્રાઃ સૂર્યાંશ તુલ્યાં તિથિમ્ ઉદ્દિશન્તિ ।
રાત્રિ દ્યુ સંજ્ઞેષુ વિલોમ જન્મ ભાગૈશ્ચ વેલાઃ ક્રમશો વિકલ્પ્યાઃ ॥ ૪॥

કે ચિચ્છશાઙ્કાધ્યુષિતાન્ નવાંશચ્છુક્લાન્ત સંજ્ઞં કથયન્તિ માસમ્ ।
લગ્ન ત્રિકોણોત્તમ વીર્યયુક્તં સમ્પ્રોચ્યતે અઙ્ગાલ ભનાદિભિર્વા ॥ ૫॥

યાવાન્ ગતઃ શીત કરો વિલગ્નાચ્ચન્દ્રાદ્ વદેત્ તાવતિ જન્મરાશિઃ ।
મીનોદયે મીનયુગં પ્રદિષ્ટં ભક્ષ્યાહૃતાકારરુતૈશ્ચ ચિન્ત્યમ્ ॥ ૬॥

હોરા નવાંશ પ્રતિમં વિલગ્નં લગ્નાદ્ રવિર્યાવતિ ચ દૃકાણે ।
તસ્માદ્ વદેત્ તાવતિ વા વિલગ્નં પ્રષ્ટુઃ પ્રસૂતાવિતિ શાસ્ત્રમ્ આહ ॥ ૭॥

જન્માદિશેલ્ લગ્નગે વીર્યગે વા છાયાઙ્ગુલ ઘ્નેર્કહતે અવશિષ્ટમ્ ।
આસીન સુમોત્થિત તિષ્ઠતાભં જાયા સુખાજ્ઞોદયગં પ્રદિષ્ટમ્ ॥ ૮॥

ગો સિંહૌ જિતુમાષ્ટમૌ ક્રિય તુલે કન્યા મૃગૌ ચ ક્રમાત્ સંવર્ગ્યો દશકાષ્ટ સપ્ત વિષયૈઃ શેષાઃ સ્વ સંખ્યા ગુણાઃ ।
જીવારાસ્ફુજિ દૈન્દવાઃ પ્રથમવચ્છેષા ગ્રહાઃ સૌમ્યવદ્ રાશીનં નિયતો વિધિર્ગ્રહયુતૈઃ કાર્યા ચ તદ્વર્ગણા ॥ ૯॥

સપ્તાહતં ત્રિ ઘન ભાજિત શેષમ્ ઋક્ષં દત્ત્વાથ વા નવ વિશોધ્ય ન વાથ વાસ્માત્ ।
એવં કલત્ર સહજાત્મજ શત્રુ ભેભ્યઃ પ્રષ્ટુર્વદેદ્ ઉદયરાશિ વશેન તેષામ્ ॥ ૧૦॥

વર્ષઋતુ માસ તિથયો દ્યુ નિશં હ્યુડૂનિ વેલોદયે ઋક્ષ નવ ભાગ વિકલ્પનાઃ સ્યુઃ ।

ભૂયો દશાદિ ગુણિતાઃ સ્વ વિકલ્પ ભક્તા વર્ષાદયો નવકદાન વિશોધનાભ્યામ્ ॥ ૧૧॥

વિજ્ઞેયાદશકેષ્વબ્દાઋતુ માસાસ્તથૈવ ચ ।
અષ્ટકેષ્વપિ માસાદ્ અર્ધાસ્તિથયશ્ચ તથા સ્મૃતાઃ ॥ ૧૨॥

દિવારાત્રિ પ્રસૂતિં ચ નક્ષત્રાનયનં તથા ।
સપ્તકષ્વપિ વર્ગેષુ નિત્યમ્ એવોપલક્ષયેત્ ॥ ૧૩॥

વેલામ્ અથ વિલગ્નં ચ હોરામ્ અંશકમ્ એવ ચ ।
પઞ્ચકેષુ વિજાનીયાન્ નષ્ટ જાતક સિદ્ધયે ॥ ૧૪॥

સંસ્કાર નામ માત્રાદ્વિ ગુણા છાયાઙ્ગુલૈઃ સમાયુક્તાઃ ।
શેષં ત્રિ નવક ભક્તાન્ નક્ષત્રં તદ્ધનિષ્ટ્ઃઆદિ ॥ ૧૫॥

દ્વિ ત્રિ ચતુર્દશદશ તિથિ સપ્ત ત્રિ ગુણા નવાષ્ટ ચેન્દ્રાદ્યાઃ ।
પઞ્ચદશઘ્નાસ્તદ્દિઙ્ મુખાન્વિતા ભધનિષ્ઠાદિ ॥ ૧૬॥

ઇતિ નષ્ટ જાતકમ્ ઇદં બહુ પ્રકારં મયા વિનિર્દિષ્ટમ્ ।
ગ્રાહ્યમ્ અતઃ સચ્છિષ્યૈઃ પરીક્ષ્યયન્તાદ્ યથા ભવતિ ॥ ૧૭॥

---

સપ્તવિંશોઽધ્યાયઃ

દ્રેષ્કાણ સ્વરૂપ

કટ્યાં સિત વસ્ત્ર વેષ્ટિતઃ કૃષ્ણઃ શક્તેવાભિરક્ષિતુમ્ ।
રૌદ્રઃ પરશું સમુદ્યતં ધત્તે રક્ત વિલોચનઃ પુમાન્ ॥ ૧॥

રક્તમ્ અમ્બરા ભૂષણ ભક્ષ્ય ચિન્તા કુમ્ભાકૃતિર્વાજિ મુખી તૃષાર્તા ।
એકેન પાદેન ચ મેષ મધ્યે દ્રેષ્કાણરૂપં યવનોપદિષ્ટમ્ ॥ ૨॥

ક્રૂરઃ કલાજ્ઞઃ કપિલઃ ક્રિયાર્થી ભગ્ન વ્રતોઽભ્યુદ્ય તદણ્ડ હસ્તઃ ।
રક્તાનિ વસ્ત્રાણિ બિભર્તિ ચણ્ડો મેષે તૃતીયઃ કથિતસ્ત્રિ ભાગઃ ॥ ૩॥

કુઞ્ચિત લૂન કચા ઘટદેહાદગ્ધ પટા તૃષિતાશન ચિત્તા ।
આભરણાન્યભિવાઞ્છતિ નારી રૂપમ્ ઇદં વૃષ ભે પ્રથમસ્ય ॥ ૪॥

ક્ષેત્રધાન્ય ગૃહધેનુ કલાજ્ઞો લાઙ્ગલે સ શકટે કુશલશ્ચ ।
સ્કન્ધમ્ ઉદ્વહતિ ગો પતિ તુલ્યં ક્ષુત્ પરોઽજ વદનો મલ વાસા ॥ ૫॥

દ્વિપ સમ કાયઃ પાણ્ડુરદંષ્ટ્રઃ શરભ સમાઙ્ઘ્રિઃ પિઙ્ગલ મૂર્તિઃ ।
અવિ મૃગ લોભ વ્યાકુલ ચિત્તો વૃષભ વનસ્ય પ્રાન્ત ગતોઽયમ્ ॥ ૬॥

સૂચ્યાશ્રયં સમભિવાઞ્છતિ કર્મ નારી રૂપાન્વિતાભરણ કાર્ય કૃતાદરા ચ ।
હીન પ્રજોચ્છ્રિત ભુજઋતુ મતી ત્રિ ભાગમ્ આદ્યં તૃતીય ભવનસ્ય વદન્તિ તજ્જ્ઞાઃ ॥ ૭॥

ઉદ્યાન સંસ્થઃ કવચી ધનુષ્માઞ્ છૂરોઽસ્ત્રધારી ગરુડાનાનાશ્ચ ।
ક્રીડાત્મજાલંકરણાર્થ ચિન્તાં કરોતિ મધ્યે મિથુનસ્યરાશેઃ ॥ ૮॥

ભૂષિતો વરુણવદ્ બહુ રત્નો બધ્દ તૂણ કવચઃ સધનુષ્કઃ ।
નૃત્ત વાદિત કલાસુ ચ વિદ્વાન્ કાવ્ય કૃન્ મિથુનરાશ્યવસાને ॥ ૯॥

પત્ર મૂલ ફલ ભૃદ્ દ્વિપ કાયઃ કાનને મલયગઃ શરભાઙ્ઘ્રિઃ ।
ક્રોડ તુલ્ય વદનો હય કણ્ઠઃ કર્કટે પ્રથમરૂપમ્ ઉશન્તિ ॥ ૧૦॥

પદ્માર્ચિતા મૂર્ધનિ ભોગિ યુક્તા સ્ત્રી કર્ક શારણ્ય ગતા વિરૌતિ ।
શાખાં પલાશસ્ય સમાશ્રિતા ચ મધ્યે સ્થિતા કર્કટકસ્યરાશેઃ ॥ ૧૧॥

ભાર્યાભરણાર્થમ્ અર્ણવં નૌસ્થો ગચ્છતિ સર્પ વેષ્ટિતઃ ।
હૈમૈશ્ચ યુતો વિભૂષણૈશ્ચિપિટાસ્યાઽન્ત્ય ગતશ્ચ કર્કટે ॥ ૧૨॥

શાલ્મલેરુપરિ ગૃધ્ર જમ્બુકૌ શ્વા નરશ્ચ મલિનામ્બરાન્વિતઃ ।
રૌતિ માતૃ પિત્ર્વિપર્યોજિતઃ સિંહરૂપમ્ ઇદમ્ આદ્યમ્ ઉચ્યતે ॥ ૧૩॥

હયાકૃતિઃ પાણ્ડુર માલ્ય શેખરો બિભર્તિ કૃષ્ણાજિન કમ્બલં નરઃ ।
દુરાસદઃ સિંહેવાત્ત કાર્મુકો નતાગ્ર નાસો મૃગરાજ મધ્યમઃ ॥ ૧૪॥

ઋક્ષાનનો વાનર તુલ્ય ચેષ્ટો બિભર્તિ દણ્ડં ફલમ્ આમિષં ચ ।
કૂર્ચી મનુષ્યઃ કુટિલૈશ્ચ કેશૈર્મૃગેશ્વરસ્યાન્ત્ય ગતસ્ત્રિ ભાગઃ ॥ ૧૫॥

પુષ્પ પ્રપૂર્ણેન ઘટેન કન્યા મલ પ્રદિગ્ધામ્બર સંવૃતાઙ્ગી ।
વસ્ત્રાર્થ સંયોગમ્ અભીષ્ટમાના ગુરોઃ કુલં વાઞ્છતિ કન્યાકાદ્યઃ ॥ ૧૬॥

પુરુષઃ પ્રગૃહીત લેખનિઃ શ્યામો વસ્ત્ર શિરા વ્યાયય કૃત્ ।
વિપુલં ચ બિભર્તિ કાર્મુકં રોમ વ્યાપ્ત તનુશ્ચ મધ્યમઃ ॥ ૧૭॥

ગૌરી સુધૌતાગ્રદુકૂલ ગુપ્તા સમુચ્છ્રિતા કુમ્ભ કટચ્છુહસ્તા ।
દેવાલયં સ્ત્રી પ્રયતા પ્રવૃત્તા વદન્તિ કન્યાન્ત્ય ગતસ્ત્રિ ભાગઃ ॥ ૧૮॥

વીથ્યન્તરાપણ ગતઃ પુરુષસ્તુલાવાન્ ઉન્માન માન કુશલઃ પ્રતિમાન હસ્તઃ ।
ભાણ્ડં વિચિન્તયતિ તસ્ય ચ મૂલ્યમ્ એતદ્ રૂપં વદન્તિ યવનાઃ પ્રથમં તુલાયાઃ ॥ ૧૯॥

કલશં પરિગૃહ્ય વિનિષ્પતિતું સમભીપ્સતિ ગૃધ્ર મુખઃ પુરુષઃ ।
ક્ષુધિતસ્તૃષિતશ્ચ કલત્ર સુતાન્ મનસેતિ તુલાધર મધ્ય ગતઃ ॥ ૨૦॥

વિભીષયંસ્તિષ્ઠતિ રત્ન ચિત્રિતો વને મૃગાન્ કાઞ્ચન તૂણ વર્મ ભૃત્ ।
ફલામિષં વાનરરૂપભૃન્ નરસ્તુલા વસાને યવનૈરુદાહૃતઃ ॥ ૨૧॥

વસ્ત્રૈર્વિહીનાભરણૈશ્ચ નારી મહા સમુદ્રાત્ સમુપૈતિ કૂલમ્ ।
સ્થાન ચ્યુતા સર્પ નિબદ્ધ પાદા મનોરમા વૃશ્ચિકરાશિ પૂર્વઃ ॥ ૨૨॥

સ્થાન સુખાન્યભિવાઞ્છતિ નારી ભર્ત્રુતુ કૃતે ભુજગાવૃતદેહા ।
કચ્છપ કુમ્ભ સ માન શરીરા વૃશ્ચિક મધ્યમરૂપમ્ ઉશન્તિ ॥ ૨૩॥

પૃથુલ ચિપિટ કૂર્મ તુલ્ય વક્ત્રઃ શ્ચ મૃગ વરાહ સૃગાલ ભીષકારી ।
અવતિ ચ મલયાકર પ્રદેશં મૃગ પતિરન્ત્ય ગતસ્ય વૃશ્ચિકસ્ય ॥ ૨૪॥

મનુષ્ય વક્ત્રોઽશ્વ સ માન કાયો ધનુર્વિગૃહ્યાયતમ્ આશ્રમસ્થઃ ।
ક્રતૂપયોજ્યાનિ તપસ્વિનશ્ચરરક્ષાદ્યો ધનુષસ્ત્રિ ભાગઃ ॥ ૨૫॥

મનોરમા ચમ્પક હેમ વર્ણા ભદ્રાસને તિષ્ઠતિ મધ્યરૂપા ।
સમુદ્રરત્નાનિ વિઘટ્ટયન્તી મધ્ય ત્રિ ભાગો ધનુષઃ પ્રદિષ્ટઃ ॥ ૨૬॥

કૂર્ચી નરો હાટક ચમ્પકાભો વરાસને દણ્ડધરો નિષણ્ણઃ ।
કૌશેયકાન્યુદ્વહતે અજિનં ચ તૃતીયરૂપં નવમસ્યરાશેઃ ॥ ૨૭॥

રોમ ચિતો મકરોપમદંષ્ટ્રઃ સૂકરકાયસ માન શરીરઃ ।
યોક્ત્રક જાલક બન્ધનધારી રૌદ્ર મુખો મકર પ્રથમસ્તુ ॥ ૨૮॥

કલાસ્વભિજ્ઞાબ્જદલાયતાક્ષી શ્યામા વિચિત્રાણિ ચ માર્ગમાણા ।
વિભૂષણાલંકૃત લોહ કર્ણા યોષા પ્રદિષ્ટા મકરસ્ય મધ્યે ॥ ૨૯॥

કિન્નરોપમ તનુઃ સ કમ્બલસ્તૂણ ચાપ કવચૈઃ સમન્વિતઃ ।
કુમ્ભમ્ ઉદ્વહતિ રત્ન ચિત્રિતં સ્કન્ધગં મકરરાશિ પશ્ચિમઃ ॥ ૩૦॥ રથોદ્ધતા)
સ્નેહ મદ્ય જલ ભોજનાગમ વ્યાકુલી કૃત મનાઃ સ કમ્બલઃ ।
કોશ કાર વસનોઽજિનાન્વિતો ગૃધ્ર તુલ્ય વદનો ઘટાદિગઃ ॥ ૩૧॥

દગ્ધે શકટે સ શાલ્મલે લોહાન્યાહરતે અઙ્ગના વને ।
મલિનેન પટેન સંવ્ર્ ્તા ભાણ્ડૈર્મૂર્ધ્નિ ગતૈશ્ચ મધ્યમઃ ॥ ૩૨॥

શ્યામઃ સરોમ શ્રવણઃ કિરીટી ત્વક્ પત્ર નિર્યાસ ફલૈર્બિભર્તિ ।
ભાણ્ડાનિ લોહ વ્યતિમિશ્રિતાનિ સઞ્ચારયન્ત્યન્ત ગતો ઘટસ્ય ॥ ૩૩॥

સ્રુગ્ ભાણ્ડ મુક્તામણિ શઙ્ખ મિસ્રૈર્વ્યાક્ષિપ્ત હસ્તઃ સ વિભૂષણશ્ચ ।

ભાર્યા વિભૂષાર્થમ્ અપાં નિધાનં નાવા પ્લવત્યાદિ ગતો ઝષસ્ય ॥ ૩૪॥

અત્યુચ્છ્રિતધ્વજ પતાકમ્ ઉપૈતિ પોતં કૂલં પ્રયાતિ જલધેઃ પરિવારયુક્તા ।
વર્ણેન ચમ્પક મુખી પ્રમદા ત્રિ ભાગો મીનસ્ય ચૈષ કથિતો મુનિભિર્દ્વિતીયઃ ॥ ૩૫॥

શ્વભ્રાન્તિકે સર્પ નિવેષ્ટિતાઙ્ગા વસ્ત્રૈર્વિહીનઃ પુરુષસ્ત્વટવ્યામ્ ।
ચૌરાનલ વ્યાકુલિતાન્તરાત્મા વિક્રોશતે અન્ત્યોપગતો ઝષસ્ય ॥ ૩૬॥

---

અષ્ટાવિંશોઽધ્યાયઃ

ઉપસંહાર

રાશિ પ્રભેદો ગ્રહયોનિ ભેદો વિયોનિ જન્માથ નિષેક કાલઃ ।
જન્માથ સદ્યો મરણં તથાયુર્દશા વિપાકોઽષ્ટક વર્ગ સંજ્ઞઃ ॥ ૧॥

કર્માજીવો રાજયોગાઃ ખયોગાશ્ચાન્દ્રા યોગાદ્ વિગ્રહાદ્યાશ્ચ યોગાઃ ।
પ્રવ્રજાથો રાશિ શીલાનિ દ્R્ષ્ટિર્ભાવસ્તસ્માદ્ આશ્રયોઽથ પ્રકીર્ણઃ ॥ ૨॥

નેષ્ટા યોગા જાતકં કામિનીનાં નિર્યાણં સ્યાન્ નેષ્ટ જન્મદૃકાણઃ ।
અધ્યાયાનાં વિંશતિઃ પઞ્ચ યુક્તા જન્મન્યેતદ્ યાત્રિકં ચાભિધાસ્યે ॥ ૩॥

પ્રશ્નાસ્તિથિર્ભં દિવસઃ ક્ષણશ્ચ ચન્દ્રો વિલગ્નં ત્વથ લગ્ન ભેદઃ ।
શુદ્ધિર્ગ્રહાણામ્ અથ ચાપ વાદો વિમિશ્રકાખ્યં તનુ વેપનં ચ ॥ ૪॥

અતઃ પરં ગુહ્યક પૂજનં સ્યાત્ સ્વપ્નં તતઃ સ્નાન વિધિઃ પ્રદિષ્ટઃ ।
યજ્ઞો ગ્રહાણામ્ અથ નિર્ગમશ્ચ ક્રમાચ્ચ દિષ્ટઃ શકુનોપદેશઃ ॥ ૫॥

વિવાહ કાલઃ કરણં ગ્રહાણાં પ્રોક્તં પૃથક્ તદ્વિપુલાથ શાખા ।
સ્કન્ધૈસ્ત્રિભિર્જ્યોતિષ સંગ્રહોઽયં મયા કૃતો દૈવ વિદાં હિતાય ॥ ૬॥

પૃથુ વિરચિતમ્ અન્યૈઃ શાસ્ત્રમ્ એતત્ સમસ્તં તદનુ લઘુ મયેદં તત્ પ્રદેશાર્થમ્ એવ ।
કૃતમ્ ઇહ હિ સમર્થં ધી વિષાણામત્વે મમયદિ હયદ્ ઉક્તં સજ્ જનૈઃ ક્ષમ્યતાં તત્ ॥ ૭॥

ગ્રન્થસ્યયા પ્રચરતોઽસ્ય વિનાશમ્ એતિ કેખ્વ્યાત્ બહુ શ્રિત મુખાધિગમ ક્રમેણ ।
યદ્ વા મયા કુકૃતમ્ અલ્પમ્ ઇહાકૃતં વા કાર્યં તદત્ર વિદુષા પરિહૃત્યરાગમ્ ॥ ૮॥

આદિત્યદાસ તનયસ્તદવાપ્ત બોધઃ કાપિત્થકે સવિતૃ લબ્ધ વર પ્રસાદઃ ।
આવન્તિકો મુનિ મતાન્યવલોક્ય સમ્યગ્ ઘોરાં વરાહમિહિરો રુચિરાં ચકાર ॥ ૯॥

દિન કર મુનિ ગુરુ ચરણ પ્રણિપાત કૃત પ્રસાદ મતિનેદમ્ ।
શાસ્ત્રમ્ ઉપસંગૃહીતં નમોઽસ્તુ પૂર્વ પ્રનેતૃભ્યઃ ॥ ૧૦॥

Encoded by Mizue Sugita December12, 1994
Avilable at ftp://ccftp.kyoto-su.ac.jp/pub/doc/sanskrit/jyotisa/bj.jyt
Converted to Itrans for Devanagari display by Radu Canahai clradu@yahoo.com

The table of Contents adhyAya and verse numbers

01. rAzi prabheda 20
02. graha.bheda 21
03. viyoni janma 8
04. niSeka 22
05. janma vidhi 26
06. ariSTa 12
07. AyurdAya 14
08. dazA antardazA 23
09. aSTakavarga 8
10. karma AjIva 4
11. rAja yoga 20
12. nAbhasa yoga 19
13. candra yoga 9
14. dvi graha yoga 5
15. pravrajyA yoga 4
16. nakSatra phala 14
17. candra rAzi zIla 13
18. rAzi zIla 20
19. duSTi phala 9
20. bhAva 11
21. Azraya yoga 10
22. prakIrNaka 6
23. aniSTa 17
24. strI jAtaka 16
25. nairyANika 15
26. naSTa jAtaka 17
27. dreSkANa sva rUpa 36

28. upasaMhAra 10

*bRihajjAtaka by varAhamihIra*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*